Shri Raghunath Temple MSS. Library,
JAMMU

No. ४२५१

Title शास्त्र दीपिका टीका प्रभा

Author श्री वैद्यनाथः व्याख्याता:

Extent 86 Age १८५६


Subject पू॰ मीमांसा शास्त्रं

प्रत्यग्दीपिकाटीका प्रथमा द्वितीयाध्यायः

४२५६

शास्त्रदीपिकायांप्रभाख्यायांद्वित्तीयोध्या पं: [redacted]

१८४०



शाटीवै॰१ ॥श्रीगणेशाय नमः॥ भावर्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ पूर्वाध्यायेन सहास्याध्याय
१ स्य हेतुहेतुमद्भावरूपां संगतिं दर्शयितुं पूर्ववृत्तमनुवदति प्रथम इत्यादिना। प्रथमपादे एवं धर्मप्रमाणनिरूपणस्य समा
प्तिः त्रिपाद्यां तु प्रकारसंभवेन तद्दार्ढ्याय प्रामाण्यप्रकारमात्रनिरूपणमिति मतव्यावर्तनायाह · प्रथमे पाद इति। अष्टे
तानां प्रामाण्यमुक्तमित्यनेनान्वयः। अर्थवादाधिकरणसामान्यविचारे नामधेयस्यापि प्रामाण्योक्तेः स्मृत्याचारप
भेया पूर्वभावो न विरुध्यते · केवलस्मरण इति · कीदृक्फलस्मरणं प्रमाणमस्येत्यर्थः · आद्य इति धर्मस्वरूपप्रमाणसाधनफ
लानां जिज्ञासाविषयाणामेकदेश इत्यर्थः। तद्विचाराद्वेति। धर्मप्रमाणरूपाङ्गविचाराद्वेत्यर्थः। धर्मे एतानि प्र
माणानीत्युक्ते तत्प्रमेयो धर्म इत्यर्थादवगम्यत इत्यर्थः। तर्हि धर्मप्रमाणतत्स्वरूपनिरूपणस्य प्रथमाध्याय एव कृ
तत्वादवशिष्टः साधनाद्यंश एव निरूपणीयो न तु कर्मभेद इत्याशङ्क्य सामान्येन धर्मावगमे तद्विशेषजिज्ञासायां ध
र्मस्वरूपविशेषज्ञापको भेद एव निरूपणीयो न तु साधनादिरित्याह वेदादीति · कार्त्स्न्येन॰ अशेषविशेषरूपेण · ए
वं च सति भेदनिरूपणस्य धर्मस्वरूपजिज्ञासान्तर्गतत्वान्न शास्त्रसंगतिरपीत्याह · अत इति। धर्मस्वरूपविशेषनिर्णा रामं॰
यकत्वादित्यर्थः। कार्यस्येति · धर्मस्वरूपविशेषनिरूपणं विना तत्साधनाकाङ्क्षानुदयादिति भावः। ननु धर्मजिज्ञासेतिमि १

त्रात्को धर्मः कथंलक्षणक इतिमाष्र्यं च प्रधानमतं तद्धर्मस्वरूपजिज्ञासायाएव प्राथम्यात् धर्मस्वरूपनिरूपणार्थमेदवि
चारस्यैव प्राथम्यापत्तेरित्याशंकायामाह सर्वं चेति। स्वरूपजिज्ञासायाः प्राथम्येपिमानाधीनामेयसिद्धिरितिन्याये
न प्रमाणनिरूपणस्यैव प्राथम्यमुचितमित्याशयः। गुरुमतेनत्वाकत्ते· नन्विति। अथातइत्यादेस्तत्रगताथशब्दस्यवे
दाध्ययनानंतर्यार्थत्वात्तदुपक्रमानुरोधेन चोपसंहारगतधर्मपदस्यवेदार्थपरत्वावसायादितिभावः। फलितमाह·
स्मृत्यादीति। आदिनाचारपरिग्रहः। स्वमतेनसमाधत्ते· नैवमिति। धर्मजिज्ञासेतित्तत्रस्वारस्यात्तत्रअथशब्दस्यानंतर्य
य मात्रार्थत्वेनवेदस्य त्वशब्दाध्ययनानंतर्यस्य चोपपत्तयोपादानादितिभावः। स्मार्तवाक्यानुदाहरणात्तश्रौतस्यैव विचा
र्यत्वमित्याशंक्याह अष्टकेति· न्यायप्रतीत्या तस्मार्तस्यापि विचार्यत्वावगतेः किंचिदुदाहरणमात्रेणाप्युपपत्तेरेषग
नुदाहरणं नबाधकमितिभावः। तत्र लक्षणाशब्दः प्रमाणपरः। सर्वथास्मार्तानुदाहरणमप्यसिद्धमित्याह· आह त्यैवेति·
विशेषतउदाहृत्यैवेत्यर्थः। प्रदेशेषु· तत्तदधिकरणस्थानेषु· द्रव्येति। प्रतिग्रहादिनैव ब्राह्मणोधनमर्जयेदिति
वेरूपइत्यर्थः। सकिंक्रत्वर्थउतपुरुषार्थ इतिविचारः करिष्यतइति योजना। नयेति· नेक्षेतोद्यंतमादित्यमित्यादी
नां प्रजापतिव्रतसमाख्यातानामपि किंक्रत्वर्थोमुतपुरुषार्थानीतिलिंगावचनविपरिणामेनयोजना· नन्वेतानिभाष्य

शाटीवैश१
२

क्षेत्तोदाहृतानि नतु सूत्रकृतेत्यत आह॥ तस्मिंस्त्विति॥ तस्मिन् पुरुषे शिष्यमाणानि विधीयमानानि स्मार्त्तानि प्राङ्मु
खो भुंजीत उदङ्मुखो मूत्रं कुर्यादित्यादीनि यमादीनि जननेनोत्पत्तिमारभ्यैव प्रवर्त्तेरन्निति॥ पूर्वपक्षसूत्रं अपि वेति सि
द्धांतसूत्रं अपि वेति पूर्वपक्षव्यावृत्तिः उपायेन उपनयनप्रभृति प्रवर्त्तेरन् कुतः वेदतुल्यत्वात् वेदाध्ययनतुल्यत्वा
त् यथा वेदाध्ययनं उपनयनानंतरं तथोपनयनादिर्नियम इति समस्त्यातान्यपीत्यर्थः। आचारोदाहरणमाह॥ आचारादि
ति॥ आचारोऽत्यमाणोपसूत्रायमानेषु गुर्वनुगमनादिषु तथा आचारानुसारेण प्रवृत्तिरित्यर्थः। अत्राद्यविचारद्वयं चतु
र्थेध्यायेऽन्त्यं विचारद्वयं षष्ठ इति ज्ञेयं। स्वोक्तार्थे वार्त्तिकसंमतिमाह॥ तथा चेति। आचार्यैरिति शेषः। अथातो धर्मजि
ज्ञासासूत्रमाद्यमिदं इत्ततमित्यस्योत्तरार्धमिदं वार्त्तिकानुसारिणां प्रतिसूत्रभाष्यानां जरूपमप्याह॥ तथा चेति। कुत्सित
स्य कवेः कृतिरसत्काव्यमिवेत्यर्थः। आशंकानिरासमुपसंहरति॥ आत इति। भेदलक्षणस्य प्राधान्ये हेत्वंतरमाह॥ तत्र भेदे
ति। शेषलक्षणादेरिति मध्यमणिन्यायेनोभयान्वयि॥ परंतु पूर्वत्र षष्ठ्यंतं प्रथममित्यत्र तु पंचम्यंतं बोध्यं। भेद
स्य लक्षणं व्युत्पादनं। शाखांतरादीनां पूर्वसंकामध्ये संख्यापा भेदकत्वमितरेभ्यो विलक्षणमित्याह॥ तत्रेति॥ तत्र तेषु
मध्ये॥ प्रकरणं प्रकरणांतरं। अपन्निरतातनतापने संख्या त्विति ग्राहिकेत्यर्थः॥ एषां। शाखांतरादीनां तथा चोत्पत्तिवा

य
रु

रांम॰
२

रु

धनेनास्याव्यापारः किंतु त[illegible]त्तानेकत्वमात्रबोधने आनत एव पशुप्रकरणे एकादश प्रयाजानन्यजतीत्यत्रैकादशत्वासं
ख्यानपंचाधिकप्रयाजबोधिका एतद्वाक्यस्योत्पत्तिविधित्वाभावादतस्तत्राहत्तिरेव न भेदः। अत्र च गुणसंख्याशब्दांत
राणां भेदं तद्वसरेवस्यामः। ननु कर्मभेदहेतुत्वेन कर्मशब्देन किमुच्यते न तावद्धात्वर्थः। शब्दांतरेण धात्वर्थभेदस्य स्पष्ट
तया भावनामात्रभेदस्य साधनीयत्वात्। नापि भावना गुणकामेष्वभावनाभेदेप्यकर्मांतरत्वसिद्धानात्। नाप्यपूर्वं शब्दांत
रादीनां तत्र व्यापाराभावादत आह। नारिहेति। कथमित्याकांक्षायामाह तत्रेति। अयं भावः। भावनैवात्र कर्मशब्देनोच्यते सा
च धात्वर्थावच्छिन्ना सकर्मिका च शब्दात्प्रतीयते। यागाद्यवच्छिन्ना स्वर्गादिभावनेति। एवंविधभावनाभेद एवैकोध्याया ४
र्थः। तत्र क्वचित्स्वासिद्धधात्वर्थभेदमुपजीव्य भावनाभेदसाधनं क्वचित्तु धात्वर्थभेदसाधनपूर्वकं भावनाभेदसाधने
क्रियारूपभावनाभेदे चावश्यंफलभेदतापूर्वभेदः फलापवर्गित्वात् क्रियायाः। गुणकामेषु सत्यपि भावनाभेदे न क
र्मांतरत्वव्यवहारः तस्योपरंजकधात्वर्थभेद एव प्रायशो दृष्टत्वादिति। स्वरूपेणेति। साक्षादित्यर्थः। तद्भेदश्चेति
भावनाभेदश्चेत्यर्थः। भेदद्वारेण भेदरूपेण द्वारेणोपायेनेति यावत्। भावार्थाधिकरणस्य भेदाध्याये का संगतिरि
त्याशंकायामाह तच्चेति। धात्वर्थभेदहेतुकापूर्वभेदफलकभावनाभेदकथनेनेत्यर्थः। कारणत्वेसति। भावनाकर

शारीवै०२१
३

णत्वे सति। प्रसक्तेति। प्रसक्तो भावनाभेदो पापिकत्वेन प्रतिपाद्यो यो धात्वर्थभेदस्तदनुनिष्पादी। तत्साध्यभावनाभे
दानुनिष्पादिनः सुतरां तदनुनिष्पादित्वात् तादृशो यो ऽपूर्वभेदस्तदनुसारस्तत्साधनमित्यर्थः। धात्वर्थस्यैवापूर्वसा
धनत्वेन धर्मत्वस्याभ्युपगमात्। धात्वर्थमात्रग्रहणेन चार्थात् द्वारभूतभावनाभेदलाभात् पृथक् तदनुक्तिः। आद्याय
स्याद्यमधिकरणमित्यत्वयः। अपोद्घातत्वेनेति। चिंताप्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते इत्युक्तेरित्यर्थः। इदानीं प्रस्तु
तमधिकरणं विषयासंभवेनाक्षिपति। किमिहेति। तत्तावद् व्रीहीनवहंतीत्यादिदृष्टार्थविषयः। तत्र किं भावव्युदस्यो ऽपू
र्वमुत द्रव्यगुणशब्देभ्य इति संज्ञायायोगात्। नाप्यदृष्टार्थं श्येनेनाभिचरन् यजेतेत्यादि। तत्र श्येनादिपदाभ्रवणोनोक्त सं
ज्ञायायोगात् श्येनपदस्य नामधेयतापाः प्रागेव साधनादित्याशयः। उत्तरमाह श्येनेनेत्यादि। अभिचरन् वैरिवधकामः।
दशापवित्रं केवलदशारूपं पवित्रं। एतेनत्विजे दत्ते सति आर्त्विज्यान्निर्हरेरन् आत्विक्कार्यी न्नुरा चेरन् आग्नीध्रे तत्सं
बंधिन्यग्नौ दशाहोतारो। तत्रीयार्थे द्वितीया। दशहोतृसंज्ञकेन मंत्रेण चित्तिः स्रुक् इत्यादिना चतुर्गृहीतेनाज्येन
जुहुयादित्यर्थः। एवं पृथिवी होतेत्यादिश्चतुर्होतृमंत्रः। द्वितीयात् तृतीयार्थे। अदृष्टार्थमिति। अवहंतीत्यादाव राम० ३
पूर्वभेदरूपफलाभावात् द्याहेत्यर्थमिदं। नियमादृष्टस्याक्रियाजन्यत्वाभावात्। दशापवित्रेणेति नित्यवदाम्नातस्य

संमार्गेण कादाचित्कसोमरसावसेकनिर्हरणार्थः संभवतीत्यदृष्टार्थ एवेत्यभिप्रायेणात्र उदाहरणं बोध्यं। तत्र क
त्वर्थसंनिधौ यजतीत्यादि पुरुषार्थे हिरण्यं भार्यमित्यादि। काम्यं चित्रादि। नैमित्तिकं यद्येतमित्यादि। द्रव्योपपदं सो
मेनेत्यादि। नामोपपदं रूपेणेत्यादि। गुणोपपदं श्वेतमालभेतेत्यादि। यद्यपि नामोपपदे किं भावकत्वेप्यपूर्वमुत्प प
त्त्यादिरूप इति संज्ञापायोगस्तथाप्येतदधिकरणोत्तरमेव नामत्वसिद्धांतं प्रदर्शतेस्तस्याप्युदाहरणत्वमविरुद्धं। तदुक्तं
माघे। स्थितं एतेनाधिकरणेन गुणविधिनामधेयविचार इति गुरुमतानुसारिणां मतमाहुः केचिदिति। अधिकारचो
दनाः फलसंबंधबोधकाविधयः। तेषु हि स्वर्गकामादेः पुरुषस्य कार्यं फलपर्यंतस्थाय्यपूर्वीरूपं लिङाभिधीयमा
नं कृतिमुखेन विषयमपेक्षमाणं धात्वर्थं विषयमुपपदार्थं विषयं वेति विचारयितुं शक्यते। उत्पत्तिवाक्यादिषु
त्वधिकारापूर्वानुवादत्वात् अंगमात्रकार्यांतरं प्रतीयते येनायं विचारः स्यादिति भावः। नामेति। नामातिरिक्तं द्रव्यगु
णाद्युपपदसत्वे हि वाजपेयाधिकरणोक्तं कर्मणः फलं प्रति विधेयत्वं गुणं प्रत्यनुवाद्यत्वं फलं प्रत्युपादेयत्वं गुणं प्र
त्युद्देश्यत्वं फलं प्रति गुणत्वं गुणं प्रति प्रधानत्वं चेति विरुद्धत्रिकद्वयमापद्येतेत्यगत्या नामैवोपपदं वाच्यमित्यर्थः।
आतेति। नामोपपदान्येवाधिकारवाक्यानीत्यर्थः। आद्यं नियमं तावदभ्युपेत्य द्वितीयनियमं दूषयति। यद्यपी

शा०टी०वै०२।१
४
५

ति॰ यौगिकेति। भावप्रधानो। गुणार्थमेव॰ गुणविध्यर्थमेव॰ नैमित्तिकेति॰ आर्त्विजैः अं ग्नेनिमित्ते आर्त्विज्य एवायं विधि ज्य
रिति न क्रत्वर्थः किंतु स्वतंत्राधिकार इति भावः। अस्त्वमत्वर्थलक्षणादोषादेव नामत्वमित्याशंक्याह॰ वाचेति। ननू
त्पत्तिवाक्ये कर्मत्वेनैव धात्वर्थावगतेस्तत्र च सोमादेः करणत्वेनैवान्वयसंभवान्न मत्वर्थलक्षणाप्रसंग इत्याशंक्या
ह॰ अप्यत्रीति॰ गुणपक्षे। गुणविधिपक्षे॰ ननु समभिधोपजनित्याद्दोसमिदादिपदस्तुद्वितीयांतत्वेन साध्यार्थकत्वात्सा
ध्यस्य च तस्य साध्यं तत्धात्वर्थान्वयायोगात्समिद्भिर्यागं कुर्यादिति मत्वर्थलक्षणा युक्ता॰ सोमेनेत्यत्र तु सोमस्य करण
त्वेन यागान्वयसंभवान्न लक्षणेत्यत आह॰ युक्तं चैतदिति। ननु॰ सोमादिपदानां नामत्वापादनोऽपपत्तिमाह॰ तथा
हीत्यादिना। तत्रापि सोमेनेत्यादावपि श्रुतिदोषसाम्यान्नामत्वस्यादित्यन्वयः। प्रथमं। अधिकारापूर्वानुवादत्वांकार्य
। प्राप्येनोत्पत्तिवाक्यगतेन लिङादिना। तदेव॰ अपूर्वान्तरमेव॰ अप्यमभिसंधि॰ अधिकारवाक्यगतेन लिङा कार्य
त्वेनापूर्वमभिधीयते। कार्यत्वं च कृतिसाध्यत्वं कृतिश्च सविषयेति विषयाकांक्षायां यागः संबध्यते॰ यागकृतिसा
ध्यमिति। कृतेश्च साक्षादपूर्वसाधनत्वासंभवाद्याग एव तद्धटकतयापि संबध्यते यागद्वारा कृतिसाध्यमिति। इत्थं च का राम०
र्यतापच्छेदकत्वरूपं साधनत्वं करणत्वाद्भिन्नमेव ततः केन कार्यमिति कृतिरूपभावनाद्वारा करणाकांक्षायां याग्राहकसंज्ञेन प्र ४

धानापूर्वैराकरणत्वेनोत्पत्तिवाक्यावगतो यागोऽत्यत्तेत तदेतत्तस्याह कयहरणमित्युच्यते॥ तदुक्तं भवनाथेन कृ
तितत्साध्यमध्यस्यो यागादिर्विषयो मतः कार्यसंघटिताकारे करणत्वेन संमत इति। करणत्वेन प्रधानापूर्वप्रति या
गस्य समस्तांगोपकृतस्यैव तदुपकारश्च न क्षणिकस्य संभवतीत्यवांतरापूर्वमवश्यं कल्प्यते तदेव चोत्पत्तिवाक्यगततलि
ङ्प्रत्ययवाच्यं पश्चादवगम्यते तत्रापि च यागस्य न साध्यतयान्वयः किंतूक्तरीत्या करणत्वेनैव तथा च तत्र सोमादेः
करणत्वेनान्वये विरुद्धत्रिकद्वयमत्वर्थलक्षणा वेति नामधेयत्वापत्तिरिति इष्टापत्तिमाशंक्य निराकरोति नचैवमि
ति पशुसोमाधिकरणगुरुणा सोमलताविधानस्योक्तेरिति भावः। केचित्तु कर्माश्रवणान्नामत्वशंकापि नेत्याहु किंच
ति नच त्रोदाहरणीभूतानां नामधिकारस्थोदाहृतानां नामोपपदत्वनियमः उक्तविध्योश्च नेहोदाहरणत्वं॥ भावार्थपदतिसू
त्रवशेन धात्वर्थयुक्तानामेवोदाहरणत्वात्तदुक्तस्यले च निर्वापालंभयोरनुवाद्यत्वेन तथात्वाभावादित्याशंक्याह सो
येति भावः साध्यरूपधात्वर्थ इवार्थाद्द्रव्यदेवतासंबंधो यस्य तत्तथा देवतासंबंधस्यापि यागसाध्यत्वात्तत्क्षतत्वाच्च नियो
गविषयत्वमित्यर्थः। पदस्य नियोगविषयत्वोक्तिरर्थद्वारिकाभावशब्देप्यऽऽपूर्वमित्यादिवत्तु ज्ञेया नन्वसंबंधस्याक्रि
यारूपस्य साक्षान्नकृतिविषयत्वायोगात्तदाक्षिप्तयागस्यैव विषयत्वं विवरणगुरुणोक्तमत आह यावेति शाब्देमेवस्वार्थेद्दा

शा॰दी॰वै॰२१
५

रानुबंधं॰ अपूर्वविषयं वदतीति तथा॰ शाबलवादितयानिबंधनाख्यभाष्यटीकायां प्रवृत्तो गुरुरेव तथोक्तवानित्य
र्थः। तथा च संबंधस्य साक्षात्स्वर्गस्य विषयत्वेपि यागद्वारा तथात्वमित्यर्थः। तेन तन्मतानुसारेण कल्प्याधिकारविधिष्वपि
व्यभिचारमाह॰ तथेति॰ अकर्त्तव्यर्थत्वात्। अकर्त्तव्यर्थत्वमत। अनारभ्याधीतत्वेन कर्त्तव्यतंगत्वात्। त्रिष्वपि उदाहरणेषु ना
मोपपदत्वाभावमाह॰ अत्रेति॰ एष्वित्यर्थः। द्वितीयनियमखंडनमुपसंहरति अतइति। फलविरोधमप्याह भाव्येति। पू
र्वपक्षे सोमादीनामपि फलापूर्वजनकत्वाददृष्टार्थस्य च प्रतिनिध्यभावान्न प्रतिनिध्युपादानं। सिद्धान्ते तु यागस्यैव फ
लापूर्वसाधनत्वे सोमादेस्तु दृष्टविधयैव यागोपयोगार्थत्वमिति सोमाभावे तत्सदृशलतारूपप्रतिनिध्युपादाने प्रयोजनमुक्तं
।सोमपदस्य नामत्वे तु तदसंगतमित्यर्थः। एवमभ्युपगतेनियममपि दूषयति नचेति। पक्षान्तरमाह कश्चहरणोत्तरं अ
वांतरव्यापारत्वेन कल्प्यमानमित्यन्वयः। आहकेण फलापूर्वेण विषयत्वे यागग्रहीतस्य तदन्वितस्येति यावत्। अवा
तरेति॰ अंगोपहितस्यैव फलापूर्वजनकतया प्राथमिकस्य तदयोगादुत्पत्त्यपूर्वपरिकल्पनं तदात्मनांगोपकारसाहित्यसंपा
दनादितिभावः। भावार्थाधात्वर्थः। आहकेण कर्मण्येव ग्रहणमिति निश्चयस्यैतदधिकरणाधीनत्वात् ततः पूर्वं च आह
केणोपपदार्थविशिष्टकर्मगत्याधेन कर्मविशिष्टोपपदार्थो वेति संदेहात् किमाहकेण ग्रहीतं कर्मावान्तरापूर्वविषयउ

सत्य
रामः
५

5

तापपदार्थ इति संशयसंभवादस्ति विचारावसर इत्याह स्यादेवमिति। ग्राहकेण कर्मणः ग्रहणस्यैतदधिकरणाधीनत्व
प्रदर्शनाय प्रतिपदाधिकरणविचारं भावार्थाधिकरणविचारं च गुरुमतानुसारेणादर्शयति किमिमित्यादि· विषयी
भवति· विषयसमर्पकाणि भवन्ति· यत्रापीति भावार्थाधिकरणसंज्ञाय प्रदर्शनाद् द्रव्यादि पदमिति· होमाश्रितद
ध्यिवदित्यर्थः। प्रतिपदाधिकरणसंशेषसिद्धान्तस्योक्तत्वाद्भावार्थाधिकरणसिद्धान्तमेव तत्पर्यवसानरूपमा
ह· तत्रेति· एवं संज्ञायेसतीत्यर्थः। क्रियाकारकयोरिवकारकादर्वयोर्विसमभिव्याहारा विज्ञेयाकुतो नान्वय इति शङ्कानि
रासायाह· कारकत्वेनेति· तृतीयाश्रुत्येत्यर्थः। कारकत्वस्य च क्रियासाधनत्वरूपत्वात्क्रियानन्वये तद्विरोध इति भावः। ननु
दध्नेन्द्रियकामस्य जुहुयादित्यादि वक्रियासाधनत्वे पि तदाश्रितस्यापूर्वसाधनता स्यादत आह अन्यत्रेति। कृतिसाध्यरूप
कार्यस्य हि कृत्यज्ञो विषयायेक्षायां साध्यरूपधात्वर्थस्यैव तत्वेनान्वयो घटते। ननु सिद्धरूपद्रव्यादेरित्यर्थः। दध्नेन्द्रिय
कामस्येत्यादौ तु होमस्य प्राप्तत्वाद् दध्यादेरेव कथंचित्क्रियानुप्रवेशेन साध्यावस्यतया कार्यान्वय इति भावः। प्रति
पदाधिकरणस्य प्रयोजनमाह· स्थिते चेति· गम्यमानः क्रियाकारकसंबन्धो न त्याज्य इति प्रतिपदाधिकरणान्यं च
स्थिते निरूपिते सति ग्राहकेण पदैर्णाविषयतया ग्रहणं भावार्थस्यैव भवतीति भावार्थाधिकरणसिद्धान्तः सिद्ध

शाटीवि०२।१ ६ 6

तीत्यर्थः । आतश्च । ग्राहकग्रहणाच्च । अपूर्वमपि । अवान्तरापूर्वमपि ततश्च संज्ञाया योगादुदाहरणानामस्यादिति शेषो
बोध्यः ९ तत्साप्यासिद्धं तु पुनः सर्वेषामदृष्टार्थानामुदाहरणानीत्याह- असति विति असिद्धे इत्यर्थः । हिरण्यं ददातीतिक्र-
त्वाग्बोधकवाक्ये प्रतिपदाधिकरणभावार्थाधिकरणपूर्वपक्षयोः क्रमेण कथनं । पश्चात् । ग्राहकग्रहणेन तु रां तदर्थ
तोपपत्त्यर्थकल्प्यमानमवान्तरापूर्वमित्यर्थः । उपसंहरति- तस्मादिति । तत्रापि हिरण्यं ददातीत्यादावपि- तस्मादिति ।
सर्वसाधारणोपसंहारः । इदानीं स्वमतेन भावार्थाधिकरणांगतया प्रतिपदाधिकरणविचारं दर्शयितुं संज्ञायमाह- त
चेति उक्तोदाहरणेष्वित्यर्थः । अनन्तरसंज्ञायस्य पूर्वसंशयार्थतां दर्शयति- यच्चेति । तस्य फलसाधनस्यानथाच यस्या-
र्थापूर्वकल्पकत्वसदमपूर्वप्रतिपादकत्वेनाद्यसंज्ञाये विवक्षितमित्यर्थः । पूर्वपक्षमाह- तत्रेति० आम्नायस्य । सर्वेषां फ
लसंबंधाभावे गौरवं तु फलसंबंधोत्र कालत्वात् फलमुखत्वयानदोष इत्याशयः । वैरूप्यपरिहाराय मत्वर्थलक्षणांगी-
कारे तु सैव दोष इत्याह- मत्वर्थेति । सर्वेषां फलसंबंधे तु क्रियाकारकसंबंधस्यारुणैकहायन्यादिवत्पार्ष्ठिकत्वान्नमत्व-
र्थलक्षणेति भावः । अत्र च सर्वेषामभेदेन साधनत्वश्रवणान्न समुच्चितानामग्नीषोमादिवत्साधनत्वं किंतु साधना- राम० ६
नां समुच्चयः परस्परापेक्षत्वादरुणैकहायन्यादिवदेकवाक्यापादानादिति बोध्यं । अदृष्टत्वात् । मानान्तरेणानव

पु

गमान्तरानानेकेति-समुच्चयपक्षेनपरमापूर्वैकत्वे●त्पत्त्यपवर्गानेकत्वप्रसंगोवोध्यः।नचगौरवस्यफलमुखत्वं-अपूर्व
कल्पनांविनाफलसंबंधस्यापर्यवसानादितिभावः।मतवर्थलक्षणौवदोष इत्याशंक्याह वरंचेति।एवमुक्तरूत्रमार्थिकंविचा
रंप्रदर्श्यप्राप्तावसरंभावार्थाधिकरणसंगत्यमाह-यदेकमिति।निःप्रयोजनतयाभावार्थाधिकरणारंभमाक्षिपति-न
न्विति-वद्धःऽदृष्टकल्पनाहिसमुच्चयपक्षएव-कस्यचित्कदाचित्फलसंबंधेतुनसापिनचानुष्ठानायविचारः।तद्भेदा
भावादित्याशयः-एकस्माद्वाक्यादनेकविधार्थवोधेवाक्यभेदप्रसंगादेकविधवाक्यार्थवोधस्यचतात्पर्यनिष्कर्षपा
धीनत्वात्तद्धेतुन्यायनिरूपणमावश्यकमित्याह-अन्यत इति-नविद्यतेनियमोयस्यसतथा।अनियतोर्थ इत्यर्थः।वि
पर्ययं।उपपदार्थस्यफलेवत्वंयागस्यतदर्थत्वं-ननुपदश्रुत्यापश्रुनासोमेनवेत्यादावमावास्यापौर्णमास्योरव्यव
स्थावोधनेदृष्टमित्याशंक्याह-वचनेति।वचनस्यवाक्यस्यव्यक्तिः स्वरूपंतद्भेदादित्यर्थः।सचद्रव्यविशिष्टयागेनफ
लंभावयेत्यागविशिष्टद्रव्येणवाफलंभावयेदित्येवंवोध्यः।यद्रूक्षेत्यादौतुवाद्राबेनविकल्पस्यैकस्यैववोधनान्न
वाक्यभेद इतिभावः।इदंचमधिकरणंक्षेपोन्यायेनस्वयंसमाहितः-प्राभाकरास्त्वयमेवपूर्वपक्षोभावार्थाधिकरणेन
निरस्यत इतिवदंतीत्याह तत्रेति-दूषयति-तादिति।अप्रमाणमेवेत्यनंतरंवाक्यमितिशेषः।इष्टापत्तिमाशंक्याह त

शा॰टी॰वै॰२१ चेतितथा हि सञ्जीत्यर्थः। प्रमाणलक्षणे प्रमाणाध्याये प्रथमे अभेदलक्षणे वाक्यार्थानध्यवसाने अनुष्ठानस्यासंदिग्धत्वे
७ नाननुष्ठापकत्वरूपमप्रामाण्यं नेतिशंकते नान्विति। पक्षद्वये पि द्रव्यादेर्यागाद्यर्थत्वं यागादेर्वा द्रव्याद्यर्थत्वमिति पक्षद्वये
पि एकरूपत्वेन द्रव्यनिष्पाद्यक्रियारूपत्वेन। किमर्थमिति। काकेदंतपरीक्षेवन्निःप्रयोजनत्वादित्यर्थः। अनुष्ठानैकरू
प्यमप्यसिद्धमित्याह आपि चेति। श्येनादीनां श्येनादिपदानां गुणविधित्वात् फलोद्देशेन श्येनद्रव्यविधायकत्वात् सोमेन
तिज्योतिष्टोमातिदेशेन सोमद्रव्यकत्वावगमादिति भावः। ननु तद्धिपदे शाधिकरणे श्येनपदस्य नामत्वस्थापनात् कथं पूर्व
पक्षे द्रव्यविधायकत्वमिति शंकानिरासाय भाष्यसंमतिमाह तथापीति। धात्वर्थस्यैव फलकरणत्वे भावार्थाधिकरणेन
सिद्धे हि तत्सामानाधिकरण्यान्नामत्वसिद्धेस्तत्पूर्वपक्षे तु उपपदार्थस्य द्रव्यादेः फलकरणत्वपाने तत्सिद्धिरित्यर्थः। नाम
निरिक्ते उपपदे प्रयोजनभेदमाह यावितीति। अपूर्वं चोदयंतीति कल्पयंतीति। अपूर्वं करणीभूतार्थकामवंतीति यावत्। यथायं पू
र्वपक्षोपदितदेतिशेषः। न प्रातनिधिरिति। अदृष्टार्थत्वादिति भावः। न हीति त्वर्थे। यथानुसिद्धांतस्तत्र द्रव्यगुणयोर्दृष्टद्वा
रेण क्रियार्थत्वात्प्रातिनिधिरिति न हि कथं पूर्वपक्ष इत्याशंकायां स्वमतेन न नमाह किंचिति। पूर्वपक्षयुक्तिसंगत्यां तिपत रामः
हाति रक्ताश्चेत्याकांक्षते तथा सिद्धस्वरूपं फलपदे नेष्टमात्रमप्लोके विवक्षितमितिसच्चयितुमाह साक्षिध इति नसाध्यान ७

रमितिः तस्यासिद्धत्वेन स्वनिष्पादनाक्षमत्वादिति भावः । नन्वविशेषेणोक्तिः पूर्वपक्षभाष्यं त्वन्मतेऽसंगतमित्याशंक्या
नध्यवसानपूर्वपक्षस्योक्तरीत्याऽसंभवादन्यथा व्याख्येयमित्याह · यावदिति । यावत इत्यर्थे मर्यादया । विशेषेति · धात्वर्थत्व
र्थे हि सन्निकृष्टत्वमात्रेण कारकत्वं तु न शक्तं किंतु कल्प्यसामादेस्तु तद्धीयथाकारके तं शक्तं तेन न तु संनिकृष्टत्वमिति फलभावनान्व नि
येन कस्यापि विशेष इत्यर्थः । स्वभावेन · सिद्धत्वरूपेण · तथा च कारकशक्तिसन्निधानयोर्द्वयोरेकत्राप्यसत्वादन्यतरस्य
चोभयत्रापि सत्वाद्विशेषेऽपि द्रव्यादेः सिद्धत्वेन योग्यतायाश्चाधिक्यात्तेषामेव फलभावनायां करणत्वमिति भावः । धा
त्वर्थस्य करणत्वसाधिकां समानपदोपात्तत्वशक्तिमुपपादयति तु फलकरणयोः साक्षादन्वयं निरस्यति भावनैवेहेति
ति । एवकारेण करणान्वयव्यवच्छेदः भवनानुकूलव्यापाररूपा हि भावना भवनाश्रयकर्मनिरूपणेनापेक्षते भावयेत् किमिति
तस्याः फलकर्मिकायां भावनायां केनेत्याकांक्षायां धात्वर्थः करणत्वेनोपमानलाघवात् एकपदोपात्तत्वेन संनिकर्षा
च्चेत्यर्थः । श्लोकव्याचष्टे फलमपीति · क्रियां कुर्वद्धि कारकमिति स्मरणात् द्वंद्वघटनेत्येतावतान्वयादर्शनात् क्रियामंतर्भा
व्यैव शाब्दशक्तिस्वाभाव्यादन्वयव्युत्पत्तेरिति भावः । नाभिनद्धात्वर्थे · तन्निवृत्तिः । धात्वर्थस्यानिष्पत्तिः । पूर्वपक्षे तु कल्प्य
नागौरवमित्याह द्रव्यादिष्वपि स्थितिः · सिद्धेन त्वसिद्धस्यानिष्पत्तिरूपदृष्टोपकारसंभवः न त्वसिद्धेनासिद्धस्य यादित्वासिद्धस्या

शीटीवै०२१
८

पियागादेस्तेनैव सोमादिना सिद्धस्य तमेव प्रत्यंगत्वं तदा आवश्यकत्वाद्द्रव्यमेव तदर्थं न्याय्यं उपकारश्च यागादिमान
दृष्टरूपो द्रव्यस्य संभवति न च द्रव्यस्य सिद्धस्य फलजनकत्वासंभवात्तद्द्योपारत्वेन यागादेर्दृष्टोपकारजनकत्वं द्रव्य
साध्यत्वस्य यागेऽवश्यंगीकरणो पुनर्द्रव्यार्थतायां मानाभावात्‌· प्रकरणप्राप्यभावेन यागोद्दाश्रयत्वादिबोधनेनाविवेगौ त
रवाच्चेत्याशयः। यद्यप्यसिद्धस्याप्यवेघातादेः सिद्धव्रीहिषु दृष्टोपकारजनकत्वमस्ति तथापि सोमेन यजेतेत्यादिवद्धु र
तरवाक्येषु तदभावादुत्सर्गतद्दृद्दमुक्तं। ननु सोमेनेति कारकश्रुत्या सोमादेः करणत्वावगमाद्धात्वर्थोद्दृष्टकल्पनमपि
प्रामाणिकत्वान्न दोष इत्यत आह यजतिकर्तृश्चेति। यदश्रुत्या पदश्रवणमात्रेण पदांतरसमभिव्याहारानिरपेक्षेण·
केवलप्रत्ययप्रयोगाभावात्प्रकृत्यर्थविशिष्टस्यैव स्वार्थस्याभिधानात् वाक्येन साकांक्षपदसमभिव्याहाररूपेणैते
याच्च कारकश्रुतिः प्रकृत्यर्थविशिष्टकरणत्वाद्यंश एव· तस्य क्रियासंबंधांशं तु वाक्यमेव लक्षणया प्रतिपादयति
वाक्यार्थे वाक्यस्य लक्षणाभ्युपगमादिति भावः। ननु सिद्धस्यैव साधनत्वं न साध्यस्येत्युक्तमत आह· साध्यस्यापीति·
फलाव्यवहितपूर्वकाले सिद्धत्वसंभवान्न साधनत्वविरोध इति भावः। धात्वर्थातिरिक्तभावनायाश्चाख्यातवाच्यत्वे सति राम०
तस्यां धात्वर्थः करणं तदेवासिद्धमिति शाब्दिकमतेन नत्रांकते कापुनरिति। विक्लृत्यादिरूपं फलमेव धात्वर्थस्तदनुकूल·

कर्तृव्यापारस्त्वाख्याततार्थः तदसत्वे पाक इत्यादौ तत्तदप्रतीतेरिति शंकते कर्त्रेति। कर्तृव्यापारो ह्यधिश्रयणादिः प
च्यादिधात्वनुवाच्य एव न फलमात्रं यथा भोगमनवान्नेति प्रयोगापत्तेः फलोत्पत्तितः प्राक् तदनुकूलाधिश्रयणादिव्या
पारारंभे पाको भवतीति प्रयोगानापत्तेश्चेति न धात्वर्थातिरिक्ता भावनास्तीत्याह नन्विति। तदैत्यर्थः। आसो० कर्तृ
व्यापारः। पचौ पचिधातुप्रयोगे। त्यागः इदं न ममेति बुद्धिरूपः सहेतुर्यस्य तादृशः प्रयत्नः प्रक्षेपादिजनक इत्यर्थः
स्वकीयद्रव्येन ममेति त्यागासंभवात् तदाकारासंकल्पाख्यमनोवृत्तिरेव स्वत्वध्वंसानुकूलो याग इत्याह संकल्पो वेति। धा
त्वर्था एवेत्येव पाठः। धात्वन्तरार्था एवेति पाठस्तु प्रामादिक एव धात्वन्तरार्थत्वेऽपि प्रकृते प्रत्ययवाच्ये तस्मिन्नु धात्वर्थस्य
करणत्वसंभवेनासंगतेः प्रयत्न इत्यादिमतं शंकायां तथानुपपत्तेश्चेति। तदभावेति। भावनाभावे इत्यर्थः। स्पंद इति। नार्कि
काभिमतक्रियेत्यर्थः। गमेरुत्तरसंयोग एवार्थ इति तद्व्यतिरिक्तासिद्धिः यत्नपक्षे सर्वेषु चेतनकर्तृकेष्वसंभवः एतत्पक्षे तु चे
तनकर्तृकेष्वपि वद्रुषुजुहोति गच्छति प्रोक्षत्यश्वं वहतीत्यादिषु धात्वर्थानुकूलशारीरस्पंदात्मकभावनासंभव इति वि
शेषः। आत्मकर्तृकेषु त्वाख्यातेष्विति शेषः। व्यभिचारः यद्यदाख्यातं तत्तत्प्रावनाभिधायीति नियमे व्यभिचारः। उभ
चेति प्रयत्नस्पंदोभयानुगतमित्यर्थः। उदासीनत्वस्य विच्छेदोऽभावः कुर्वद्रूपत्वं सहकारिनिरपेक्षकार्यजनकत्वमिति

शीठी वै०२।१
६
9

यावत्।प्रयत्नस्पंदाभ्यां हि चेष्टासंयोगादिजननेन किंचिदपेक्ष्यत इति भावः। शाब्दीति। तथा च शाब्दीमिद धात्वीति
प्रयोगानुपपत्तिरिति भावः। इष्टापत्तौ वार्त्तिकविरोध इत्याह तत्रेति। तत्र मत इत्यर्थः। अभिधाया। शब्दस्य भावना
शाब्दभावनामित्यर्थः। लिङादाय आङ्कारित्याख्यातेन शाब्दभावनाभिधानानुकूलव्यापाररूपायामार्थीभावना
यास्तिङादिषु प्रतिपादनाद्विरोध इत्याशयः। रूपस्वरूपं धात्वर्थेति पाकाद्यनुकूलव्यापाररूपाणि अयपणादेर्धात्वर्था
द्वेदनेषाभावनापद्यपि न लक्ष्यते तेषामपि भावनात्वात्तथापि सर्वधात्वर्थसामान्यरूपेणान्यातेभ्यो भिन्ना वगम्यते। सर्व
धात्वर्थानुयायिकरोतिना पचति पाकं करोतीत्याख्यातविवरणात् करोतिभावपत्यो अवपर्यायत्वात्तदर्थ एव भावनेत्यर्थः।
विशिष्टामिति कथ्यमानानां प्रकृतिप्रत्ययाभ्यां बोध्यमानानां तद्रूपभेदात्। यागत्वान्योत्पादानुकूलत्वधर्मभेदात्। धात्वर्थे
संगतिः शक्तिर्द्विधा द्विरूपा। यागत्वावच्छिन्ना धातोः अन्योत्पत्त्यनुकूलत्वावच्छिन्ना प्रत्ययस्येत्यर्थः। तथा चान्योत्पादानु
कूलात्मा भावना किं कुतः प्रदुष्यति धात्वर्थ एव भावनेति कथं भावनायां धात्वर्थस्य करणत्वमिति दोषो नेत्यर्थः। मत
दोषस्य विषयमतभावनायामारोपेणोत्यमुक्तिः। एतदेव विवृणोति एतदिति। अक्रियात्मकत्वे हेतुं विवृणोति। अन्योत्पा
दानुकूलव्यापारत्वेनाप्रतीयमानमित्यर्थः। सर्वधात्वर्थानुयायित्वेनुभवं प्रमाणयति तथाहीति। प्रत्ययं अनुभवंति।

रा०म०
९

प्रत्ययस्यैवविषयीभवंतीत्यर्थः।धात्वर्थोद्वैतस्तस्यापमाह।तच्चेति।तस्यभावनापदवाच्यत्वेहेतुमाह।तदेवेति।भवितुः।
भवनाश्रयस्यानुकूलंकरोतीति।क्रियमाणोनेनकश्चित्कर्मणात्वनामवत्यर्थस्यकर्तृचकरोतेः।कर्मजायतइति।ननुधा
तुप्रत्ययसमभिव्याहारेप्रतीयमानायाभावनायाःप्रत्ययवाच्यत्वमेवेत्यत्रकिंनियामकमतआह।तन्त्रेति।पाका
दौ।पाकइत्यादौ।तत्स्वरूपेणेति।नप्रयत्नत्वादिनेत्यर्थः।नियमेनकर्मसाकांक्षत्वानुपपत्तेरित्याशयः।किंत्वन्योन्या
दानुकूलंरूपंभावनानामाङ्करितिव्यवहितेनसंबंधः।ननुपचतिपाकंकरोतीतिविवरणात्कर्मत्वेनैवधात्वर्थान्वयोदृश्य
तेतत्कथमत्रधात्वर्थस्यकरणत्वमुत्पाद्यतइत्याशङ्क्याह।तस्मिंश्चेति।नेत्राद्यान्वयेभावनास्वरूपंदर्शयतितद्धेति।
यागानुवादेनगुणविधावितिभावः।तद्धेतुमतः।पागहेतुमतः।एतच्चफलमेवधात्वर्थइतिमंडनमतानुसारेणाचोध्यं।
मतएवधात्वंतरार्थोपीत्युक्तं।यज्यादिधात्वर्थोपीत्यर्थः।प्रमाणांतरेति।त्यागान्वयव्यतिरेकयाहिप्रमाणोत्यर्थः।
स्वरूपते।उच्यते।विधिवशात्।प्रवर्तनान्वयबलात्।पुरुषार्थसाधनएवप्रवर्तनान्वयात्यागस्यचापुरुषार्थत्वा
त्तत्कर्मकभावनायांतदन्वययोगात्पुरुषार्थभूतस्वर्गादेरेवभावनायांकर्मत्वंयागस्यतुकरणत्वमित्यर्थः।यद्दव
स्यइति।स्वसाधननिष्पादितः।स्वांगजन्योपकारस्युक्तंइत्यर्थः।येनेति।स्वरूपनिष्पादकफलोपकार्यंगसमूहरूपेणोत्य

शा॰टी॰वै॰श॰ १० र्थः। प्रमाणान्तरेति । श्रुतिप्रकरणादिसहितावघातादिशास्त्रवेद्याङ्गजन्यदृष्टादृष्टोपकारसंपादनात्मकमित्यर्थः।
तथा यागे इति । करणं हि कुठारादिकं उद्यमननिपातनादिरूपकर्तृव्यापारविषयं सत् फलं छिदादि जनयति । एवं यागो
10 पि करणत्वात्पुरुषव्यापारविषयोवगम्यत इत्यर्थः। तत्र व्यापारसामान्यावगतो । तथा च व्यापारसामान्यस्याख्यात
वाच्यत्वे विशेषाकाङ्क्षायामभावात्प्रयाजादीनां प्रधानाङ्गत्वेनान्वयो न स्यादिति भावः। कथंभाव परितव्यमित्यस्यै
व विवरणं कोसौ व्यापार इति । प्रपञ्चः सामान्यतः प्रतीताया विशेषविस्तारः। ननु प्रयाजादिव्यापारोस्य न साक्षात्फल २
साधनत्वं यागस्यैव तथात्वात् । नापि यागसाधनता द्रव्यदेवतादेरेव तथात्वात् अत आह नन्वेति ॥ फलसाधनात्म
ना। फलोत्पादनयोग्यत्वात्मना एवं च करणनिष्ठयोग्यताजननेन तदुपयोग इत्यर्थः। न चैतदिहैव कल्प्यते किन्तु सर्वत्र
कर्तृव्यापारोपकृतस्यैव करणत्वं दृष्टमित्याह । एतदेवेति । द्वैधीभावसाधनत्वस्य सनन्तरं संपत्तिः करणत्वमित्यनुषङ्गः॥
धात्वर्थातिरिक्ता । प्रकृतिभूतधात्वर्थातिरिक्ता। ननु करोत्यास सर्वधात्वर्थानुगतमन्योत्पत्त्यनुकूलव्यापारसामान्यं भा
वनेति पर्यवसितो तथा च प्रकृतिभूतधात्वर्थस्यापि तदन्तर्गतत्वात्कथं तदतिरिक्तभावनासिद्धिः कथं च धात्वर्थभेदा रा॰म॰
त् भेदस्य व दृश्यमानस्य सिद्धिः कथं च तस्याधात्वर्थस्य कर्मत्वं करणत्वं वेत्याशङ्क्य नत्रोक्तेन न्वेति । आख्यातेनानुकू १०

त्वव्यापारसामान्याभिधानेपि तत्र तत्फलवाचिधातुसमभिव्याहारात्तत्तदनुकूलव्यापारावगमादानुकूल्यस्य च फल
भेदेन भेदात्तत्सर्वधात्वर्थे धात्वर्थसाधारण्यमित्याह नन्वीति· नन्वेवं सत्याख्यातत्वेनानार्थत्वापत्तिरत आह· भिन्नेष्विति ते
ष्वरूपेषु तत्तदनुकूलत्वेषु। भावनात्वेति। अनुकूलत्वत्वरूपानुगतधर्मेणोक्ष्पाल्लानेकार्थत्वेतिभावः। करणत्व सामान्ये
करणत्वत्वावच्छिन्नकरणत्वे। नन्वेवमप्यस्तु धातुफलभेदाद्भिन्ना भावना यजेत स्वर्गकाम इत्यत्र तु स्वर्गानुकूलव्यापा
रो यथा प्रयाजादिस्तथ्याघागोपीति न तदतिरिक्तभावनासिद्धिरत आह· अपचेति· सकलधात्वर्थानुगतैकभावनानां
मीत्येको विशेषः। प्रागुक्तः प्रकृतिप्रत्ययधात्वर्थसाधारणीभावनानोपभवतीत्यपर इत्यर्थः। तत्प्रतिरूपेण। यज्याद्यर्थसं
वधिव्यापाररूपेण नयाजिरेव नैव यागः। सतु संकल्पादिरुक्तः। कुतो यागस्याख्यातेन भावनात्वेनानाभिधानमत आ
ह यजिस्त्विति· यागानुवादेन गुणविधौ यागस्य कर्मतायाः फले यागविधौ च करणतापाततायासत्यनुपपत्तेः
न हि याग एव यागकर्मकस्तत्करणको वा सम्भवतीति भावः। नन्वेतावता प्रकृतिप्रत्ययधात्वर्थातिरेकेपि तदतिरि
क्तसंकल्पत्यादिधात्वर्थातिरेको न सिद्ध इत्याशंक्याह· धात्वन्तरेणेति· तस्य· भावनारूपसंकल्पादेः धात्वन्तरा
भिधेयत्वेपि प्रकृतिप्रत्ययधात्वर्थस्य तत्र कर्मकरणत्वयोरविरोधादिष्टापत्तिरिति भावः। मतान्तरेप्येवमेवेत्याह·

यथेति॰ प्रकृताधिकरणमुपसंहरति॰ तत्र चेति॰ सूत्रार्थस्तु॰ कर्मशब्दाधानवस्तद्यर्थइति यावत्तभावार्थाभाव
नार्थास्तद्वच्छेदकास्तेष्वपि एवं कियान्यपूर्वोत्पत्तिः प्रतीयेत तर्हि यस्मादेषोऽर्थः धात्वर्थो विधीयते॰ पदश्रुतिरूपस
न्निकर्षादिति॰ प्रयोजनं तु प्रतिनिधिसदसद्भावः सिद्धान्तपूर्वपक्षयोः प्रागेव दर्शितः चोदना पुनरारम्भः। तस्मात्त्विति
अपूर्वस्येत्यर्थः तेनाक्षेपरूपानन्तरसंगतिरुक्ता॰ वर्तमानं त्वपूर्वाख्यं॰ अन्यस्य यथानुपपत्त्यैवापूर्वकल्पप्रमि
तिशंकते यद्य पुनरिति। श्रुतोपपादकस्यैव श्रुतान्यथानुपपत्त्या सिद्धिर्न चापूर्वं तत्पेत्याह॰ अपूर्वे पीति॰ न यागादि
ति॰ अव्यवहितपूर्ववृत्तित्वाभावादन्यथासिद्धत्वाच्चेति भावः। शक्तिरिति। शक्तिशक्तिमतोरभेदादव्यवहितपूर्व
वृत्तित्वोपपादनं। अवान्तरेत्यन्यथासिद्धिनिरासः व्यापारेणाव्यापारिणास्तदभावात्। कथं तर्हि यागस्य फलसाध
नत्वोपपत्तिरित्याशंक्याह तस्मादिति। फलसाधनं॰ फलोत्पादनं। नापूर्वमिति। कल्पनागौरवादिति भावः। प्रमाण
विरोधस्य पक्षद्वयेपि तुल्यत्वात् प्रमाणविरोधपरिहाराय हि कल्पना कथं प्रमाणविरोधेन तद्वस्येभवेदित्याह। हि
नस्येति॰ सिद्धान्ते प्रमाणविरोधपरिहाराय तारथ्वेति॰ वा वाध्यर्थमेवधानं। काष्ठादीनामित्यादिपदेन संस्कारारव्य
शक्तिद्वारास्मृतिजनकस्य पूर्वानुभवस्य ग्रहणं। चालयेतिशब्दस्तु पलक्षणं। यथैवेति। आत्मादावनुभवशक्तिरूपः

संस्कारोपयोगीति भावः। ननु व्यापारिणि न एकपदपर्वादिरवांतरव्यापारजन्यव्यापारिसापेक्षत्वाद्व्यापारतापोत्प ३
न आह। एवमेवेति। साधनेन साध्यमानत्वे सति तत्फलसाधनत्वमेवावांतरव्यापारत्वं न तु साधनाश्रितत्वमपीति
वकारार्थः। यद्यपि ज्वालायां काष्ठाश्रितत्वमप्यस्ति तथापि तद्दृष्टान्तस्य नोपयोग इति तात्पर्यम्। प्रक्रियेति। अपूर्व
कल्पनाप्रकार इत्यर्थः। उत्पत्त्यपूर्वाद्विपत्तिकप्रथमपर्वं क्रियत इतीत्यनंतरमपेक्षायामिति शेषः। अपूर्वकरणा
प्रकारस्यान्तानंतत्वेनेति कर्तव्यताकांक्षायामित्यर्थः। तत इति। एतत्स्वापूर्वानंतरं कल्प्यत इत्यनेन संबध्यते। विषयीकृत
स्यत्र पक्कतस्य न स्वरूपेणेति। क्षणिकत्वादिति भावः। तथा चोत्पत्त्यपूर्वं गजनितोपकारसंपत्तिरिति बोध्यं। न चैवं सति
किं परमापूर्वेणेति वाच्यं फलसाधनताबोधपर्यवसानोत्तरं कथंभावाकांक्षायामंगान्वयात्तत्पर्यवसानस्य च फ त
लापूर्वकल्पनां विनानुपपत्तेः प्रथमं तत्कल्पनानंतरं पश्चात्त्वंगोपकारस्याहित्याप्रतिकर्तव्यताकांक्षया प्रतीयत इतित्ति
द्ध्यर्थमुत्पत्त्यपूर्वं कल्प्यत इत्यपूर्वद्वयसिद्धिः। अत एव सर्वेषां धर्माणामपूर्वार्थत्वं सप्रमाणं घोषितं जनैरिष्यते। एवं स
त्का र्वसाधारणेनो[illegible]क्वचिद्विशेषमाह दर्शेति। पक्षादौ प्रवर्त्तिन्यां कृत्स्नमनुष्ठेयपक्षांतर्गतदर्शपौर्णमासागतानां समुदा
याभ्यामाग्नेयादियागत्रिकसमुदायावच्छिन्नाभ्यां दर्शपौर्णमासपदवाच्याभ्यां। युगपदिति। एकैकत्रिकस्यापि न्नाणि

शाबीवै०२१ १२ 12

प२

कर्तृत्याग्योगपदार्थस्यासंभवः किमुत त्रिकरूपस्येत्यर्थः अयमर्थः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्येन द
र्शपूर्णमाससंदावगतसमुदायरूपावच्छिन्ने द्वंद्वावगतसाहित्यावच्छिन्ने फलापूर्वजनकतायाः प्रतीतेः साहित्यस्य
चापूर्वं विनानुपपत्तेः समुदायापूर्वरूपकल्पनेति · पौर्णमास्यधिकरणे तु समुदायस्य फलसाधनत्वं वार्त्तिककारैर्नि
राकृतं तेन तु समुदायावच्छिन्नत्वेन त्रिकरूपस्येति न तद्विरोधः न चौत्पत्तिकैरेव साहित्योपपत्तिः तत्कल्पनायाः एतत्कल्प त्य
नोत्तरभावित्वादित्याह नादिति · वस्तुतस्तु पौर्णमास्यां पौर्णमास्या यजेतेत्यमावास्यायाममावास्यया यजेतेति तत्तत्समुदा
यावच्छिन्नसाधनतायाः किंचित्कार्यनिरूपितत्वलिंगदर्शनबलाद्दर्शपूर्णमासाभ्यामित्येषप्रति पदेन न ग्रंथस्य क्लिष्ट
मित्यत्र समुदायापूर्वमेव फलापूर्वारंभोपयिकतया कल्प्यत इति नोत्पत्त्यपूर्वैरन्यथासिद्धिरिति। एवं यथाश्रुते ग्रं
थसामंजस्ये सति यदेतत्ग्रंथस्य क्लिष्टगत्या पौर्णमास्यां पौर्णमास्यया यजेतेति वाक्यपरतया सोमनाथीयं व्याख्या
नं तदनादेयम् उत्पत्त्यपूर्वैः परमापूर्वस्यान्यथासिद्धिं निराकर्तुमाह यदिपुनरिति · आग्नेयानां। प्रयाजादीनां। फलापू रांम० १२
र्वार्थत्वात्तदुपकृतेभ्यो यागेभ्यः फलापूर्वाणीति वाच्यं न चास्थिराणां यागानां तदुपकार्यत्वं संभवतीत्यन्यान्युत्पत्त्य
पूर्वाणि षडिति गौरवं स्यादित्यर्थः अंगेष्वपूर्वकल्पनाप्रकारमाह नयेति · संहत्यामिलित्वा प्रयोगवचनेन सहितानां

प्रधानोपकारकत्वावगमात्साहित्यस्य च स्वरूपतः क्षणिकत्वेनासंभवात्तत्सिद्ध्यर्थं प्रत्येकमुत्पत्त्यपवर्गाणि कल्प्यन्त इ
त्यर्थः। एवं साहित्ये रङ्गैः किंक्रियेतेत्यत आह ननात इति। अत्र सामर्थ्याद्बोधनादिशब्दैर्योगपत्तो च्यते सा च प्रधानपूर्वदृष्टिभिः
प्रोक्षणादिभिः संनिपत्योपकारिभिरङ्गैः प्रधाने उत्पन्नापूर्वजननानुकूलता तत्समकाले सतु उत्तरकाले ऽव प्रक्षेपस्विष्ट
कृदादिभिः सांनिपातिकैरारादुपकारकैश्च उत्पन्नस्य पूर्वैः परमापूर्वजननानुकूला जन्यत इति ज्ञेयं तच प्रधानस्य फलजन
नार्थं परमापूर्वमिवाङ्गानां योगपत्ताजननार्थमादौ समुदितेभ्य एकमपूर्वं कल्पनीयम्। कल्पितं च तन्न्यायसुधाका
रादिभिरिति कथमत्र तदनुक्तिरिति वाच्य कालान्तरभाविफलसाधनत्वेन श्रुतस्य प्रधानस्य तदुपपत्त्यर्थं फलापूर्वक
ल्पने एवमङ्गानां तदश्रवणेन कल्पनीयप्रयोगविध्यवगम्यमानसाहित्यसंपादनाय कल्पितैरुत्पत्त्यपूर्वैरेवोपकारस्या
पि सिद्धेः। तथा चाङ्गजन्यदृष्टादृष्टोपकारवत्त्वे योग्यता जनिका न तु सर्वाङ्गजन्यमेकमपूर्वान्तरमिति त्रिभिश्चारणमा
त्राय:। सामवाप्यिकारादुपकारकाङ्गभेदेन योग्यताविभागमाह नन्वात्विति। राजसाति त्रायं उत्पत्त्यपूर्वजननानुकू
लयोग्यता। कथं तर्हि सर्वेषामेकरूपेतिकर्तव्यताकाङ्क्षयाग्रहहणं तत्राह एवमिति। सा क्षान्यपरंपरारूपप्रका
रभेदेपीत्यर्थः। करणानुग्राहकत्वस्योभयत्र सत्वादेकरूपयाऽऽकाङ्क्षया ग्रहणं युक्तमित्यर्थः। आधिकरणामु

शा॰टी॰वे॰श॰

१३ पसंहरति॰ तस्मादिति॰ प्रयोजनत्वेऽपूर्वानङ्गीकारे विकृतावङ्गानुष्ठानं न स्यात्तत्र कृतौ कृतानामेवाङ्गानां ध्वंसस्य सुत्वात् । अपूर्व
सत्त्वे तस्य फलनाशपर्यन्ततया पुनरनुष्ठानसिद्धिः । स्वत्रार्थश्रुतः॰ चोदनाश्रपूर्वं पुनरस्ति॰ यत्तत्रारंभः फलस्येति । तन्निवेदगुणप्र
धानभूतानि । अपूर्वाधिकरणस्य भावार्थाधिकरणशेषत्वाज्ज्ञावार्थाधिकरणोनैवास्याधिकरणस्य संगतिमाह॰ एवमिति
सर्वमाख्यातजं नामेति वदिद्भिः ख्यातजन्मादेर्धातुपरः । तस्येति॰ धात्वर्थभावनाभेदानुनिष्पाद्यपूर्वभेदस्येत्यर्थः । यद्यपि
भावार्थाधिकरणप्रतिपाद्यस्य धात्वर्थगतापूर्वभावनाकरणत्वस्यापवादः क्रियत इति वक्तुं युक्तं तथापि तत्फलीभूता
पूर्वभेदस्याद्यापार्थत्वेन प्राचाम्यादध्यायसंगत्यर्थमेवमुक्तिः । ननु अवघातादेर्वितुषीभावादिदृष्टप्रयोजनद्वारे
णाश्रीत्याद्यर्थत्वस्य क्लृप्तीयाः स्यास्फुटप्रतीतेः कथमयं संशयस्तत्राह तत्रेति॰ वैतुष्यादिदृष्टार्थत्वस्य लोकसिद्ध
त्वेन तत्र विधिवैयर्थ्याददृष्टार्थत्वेनैव विधिर्वक्तव्य इत्यर्थः । तच्च॰ अदृष्टं च॰ साध्यभूतानां क्रतिसाध्यस्वरूपानं सिद्धस
पद्रव्यस्य तज्जनकत्वासंभवादिति भावः । ननु अवघातरूपव्यापारविशिष्टात् द्रव्याददृष्टमङ्गीकार्यमत आह तथाहीति॰ स राम॰
नीतिशेषः । भूतस्य सिद्धस्य तन्निर्वृत्या अवघातादिधात्वर्थनिष्पत्त्या । अन्यथा । द्रव्यस्यादृष्टार्थत्वे॰ अदृष्टद्वयमिति । द्रव्य
विशेषणीभूतावघातादेर्व्रीह्याद्यर्थत्वेन विधिवशादवघातस्यापि द्रव्यगतादृष्टोपकारजनकत्वस्यावश्यकत्वादिति भा १३

13

वः। पूर्वपक्षमुपसंहरति। तस्मादिति। व्रीहिभिर्यजेतेति यागसाधनत्वेन विहितव्रीह्युद्देशेनावघातस्यापेक्षि
तत्तु षविमोकोपकारार्थत्वेन विधानान्नादृष्टकल्पनाप्रसक्तिरिति नखिन्नीयाभ्युक्तिभंगेन व्रीहिविशिष्टावघा
तविधिरिति सिद्धांतमाह स्यादेवमिति। अत्र व्रीहिषु नादृष्टं व्रीह्यर्थत्वे। कर्मोपयिकं पुरोडाशहविष्टुयाकंमो
पकारकं नन्ववश्यापेक्षितं तुषविमोकार्थं तत्यालोकतस्त एवावघातप्राप्तेः किं विधिनेत्यत आह नियममिति। अत्रावघात
तैवनखविदलनादेरपि कदाचित्प्राप्यावघातनियमासिद्धेरदृष्टविधिः। विधीयमानस्य च नियमस्यापकारेण दृ
ष्टः संभवतीत्यदृष्टकल्प्यमिति भावः। पूर्वपक्षे त्ववघातोऽदृष्टमेकं यः। किंचिद्दृव्यादप्यवघातसिद्धेस्तत्र व्रीहिनि
यमादपरमित्यदृष्टद्वयापत्तिरित्याह। तच्चेति। नन्वेवमवघातादपूर्वसत्वात्कथं सिद्धांतकोटिसिद्धिस्तत्राह दृष्टार्थे
वघातेति। अवघातो दृष्टार्थ एव तन्नियमः परमदृष्टार्थ इति न विरोध इति भावः। यदाप्यत्राव नियमान्नादृष्टं किंत्व
वघातादेवेति मतं तदापि न तस्य मुख्यत्वं किंतु दृष्टवितुषीभावस्यैवेत्युपगमान्न दोषः। स्वतंत्र प्रयोजनीभूतादृष्टाभा
वस्यैवात्र प्रतिपादनादिति ध्येयम्। प्रयोजनं तु पूर्वपक्षे यवसाध्यप्रयोगेऽपि व्रीह्यवघातस्य प्रयाजादिवदनुष्ठाने।
सिद्धांते नेति सूत्रार्थस्तु तान्याख्यातानि गुणप्रधानभूतानीति द्वैधं द्विधेत्यर्थ इति॥ धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः क

14

प्रयाजवत् ॥ दृष्टोपकारित्वस्य पूर्वाधिकरणसिद्धान्तहेतोः प्रत्युदाहरणरूपसंगतिमाह यत्रेति । ननु द्वितीयस्याद्द्रव्यसं
स्कारत्वावगमात्कथं प्रधानकर्मत्वसंदेहस्तत्राह । तदर्थत्वेति । फलीभूताध्यायार्थापूर्वभेदाभेदानुपयोगिनोऽस्य विचारस्या
ध्यायासंगतिमाशंकते यद्यपीति । आरम्भस्येति । सिद्धान्तिमत इति शेषः पूर्वपक्षिणा गुणकर्मत्वस्याङ्गीकारात्प्रधान
कर्मत्वस्येष्टत्वात्त्वाव्याप्यतिव्याप्योरसंभवात् । येषां द्रव्यं चिकीर्ष्यते गुणास्तत्र प्रतीयेतेत्यस्य सूत्रस्य यैः कर्मभिर्द्रव्यं
चिकीर्ष्यते दृष्टोपकारविशिष्टं कर्तुमिष्यते तत्र गुणकर्मत्वमित्यर्थः । तथा येषां द्रव्यं न चिकीर्ष्यते तानि प्रधानभूता
नीति प्रधानकर्मलक्षणसूत्रस्य च । तदिदमिति । पूर्वपक्षिणा सिद्धान्तिनं प्रत्यापादितमाशंकाद्वयं निराकर्तुमित्यर्थः ॥
तथा च पूर्वाधिकरणगतलक्षणसूत्रादापाततः प्रतीयमानार्थमुदासेन तात्पर्यार्थकथनार्थमयमारंभ इति भावः ।
द्रव्यगुणत्वमिति । द्रव्याङ्गत्वमित्यर्थः । तथा च द्रव्यदेवतान्यतरसंस्कारकत्वमेव गुणकर्मलक्षणमिति भावः । लक्षणाद्ध्य
मिति । दृष्टोपकारत्वेन तद्भावरूपमित्यर्थः । न गुणेति । न गुणकर्मत्वप्रधानकर्मत्वव्यवस्थापकमित्यर्थः । तेन । अपूर्वस रामं०
दसद्भावस्य प्रतिपिपादयिषितत्वेन । उपपक्षिप्रेक्षितं । तथा चापूर्वप्रतिपादकगुणकर्मलक्षणाद् दृष्टोपकारित्वं तत्र विवक्षि १४
तमिति भावः । लक्षणामिति । द्रव्यसंस्कारकत्वं गुणकर्मसामान्यलक्षणमित्यर्थः । ननु द्वितीयाश्रुतिसत्त्वे कथं पूर्वपक्षसंभ

वस्तुपात्रं काय्यामाह अत्रेति। नहीति यदीति। गुणकर्मत्वलक्षणमित्यनुषंगः। लक्षणं बोधिका। प्रकृत्यर्थस्य साध्यत्वं बोध
यती हि हीति यासमभिव्याहृतक्रियानिरूपितत्वं द्योतयती क्रियायास्तद्गुणत्वं बोधयेत् न त्वेवं तस्याः साधनत्वबोधक
त्वादित्याह व्यभिचारादिति। सर्वत्र लोके वेदे च बल्बजास्तरणादि विशेषः। बाधेऽवृकोन्नु। मम स्तरणकारणं। बल्वजानां
सिद्धत्वया न साध्यत्वमिति भावः। सक्तूनिति। सक्तूनां होमेन नाशान्न होमसंस्कार्यत्वं निष्फलत्वादिति भावः। न
नु घटं करोतीत्यादावसिद्धस्य घटादेर्न साधनत्वमिति तुल्यो व्यभिचारस्तत्राह साधनत्वमिति। तेन द्वारा घटादे
र्हेतुत्वमिति भावः। अवघातादिव्यावृत्त्यर्थमाह दृष्टेति। तथा च दृष्टार्थत्वमेव गुणकर्मत्वलक्षणमिति भावः।
आचारात् प्रयोगरूपात् सोप्यनुकूल एवेत्याह। प्रयोगश्चेति। तादृशः तदनुसारी। तथा चोक्तमित्यस्यार्थमा
ह। यथेति। अग्नेः कार्यत्वं श्राकाम पाकरोति। ईप्सितानीप्सितेति। उभयानुगतं साध्यत्वसामान्यमेव कर्मत्वमित्यर्थः।
ननु तर्हि साध्यं कर्मेत्येवानुशासनं स्यान्नेप्सिततम इति चेत् अत्राहुः। वारणार्थानामीप्सित इति सूत्रे गणे मारणा
वकं वारयतीत्यत्रेप्सितस्याग्नेरुपादानसंगत्या कर्मसंज्ञाया बाधो वाच्यः। साध्यत्वमात्रस्य कर्मत्वे माणवकस्याप
त्रिसंबंधाभावविशिष्टत्वेन साध्यत्वान्नस्याप्युपादानत्वं स्यात्। ततः कर्तुरीप्सिततमं कर्मेति इष्टयोगवशं वाच्यं एवं

शारीवे०शा
१५
15

चमाराव कस्येप्सिततमत्वात्कर्मसंज्ञैव ईप्सितमात्रस्य त्वेरपादानसंज्ञेति द्वेष्योपेक्ष्यसंग्राहकं तथायुक्त
मिति सूत्रमावश्यकमिति। निर्मलमिति। प्रयोगमलत्वाख्याकरणस्मृतेर्मलत्वमत्र प्रयोगस्यान्यथेत्यर्थः। यस्ये
ति· सामानाधिकरण्येन साध्यत्वोपलक्षितं साधनत्वमित्यर्थः। तदेव साध्यत्वमेव· ईप्सितं हीति। अंगविषयक
कृत्युद्देश्यत्वस्य ज्ञोबित्वाद् उद्देश्यतायाश्चेप्सितत्वमंतरेणासंभवादिति भावः। प्रमाणांतरेणासमीहितत्वेनावग
तं प्रतिज्ञप्राप्तं साधनत्वमेव विधिबोध्यं न तु समीहितत्वमपीति शंकते नन्विति। न स्वरूपतः समीहितत्वं विधिग
म्यं किंतु स्वविषयक्रियया साध्यितुमिष्टत्वं तत्र साध्यत्वांशो द्वितीयागम्य उद्देश्यत्वं कृति निरूपितं विधिगम्यं तन्नीप्सि
तभाव्यायां क्रियायां विध्यसंभवादिति परिहरति कोनामेत्यादिना। स तु निष्पन्नसाधनवाचित्वं पूर्वपक्षमुक्तं परिह
रति यत्तूक्तमिति· विधिविरोधात्तत्र लक्षणा न तु शक्तिरित्यर्थः। कारणत्वेन· द्वितीयारूपवाचकबलेन प्रयोजनं पू
र्वपक्षे चातुर्मास्यादौ सुविष्टकृद्भावपिकपिंजलाधिकरणन्यायेन तिष्ठतिरेव संमार्गः एव प्रयोगेपि व्रीहि प्रोक्षणा
मेवेत्यादि· सिद्धांते तु· सकलस्रुक्संमार्गः एवं नामेव च प्रोक्षणमिति। सक्त्वार्थस्य धर्ममात्रे दृष्टोपकाररहिते स्फ राम०
ते प्रयाज एव त्वप्रधानकर्मैवस्यात्तु· दृष्टोपकारस्यानिर्वृत्तेरिति पूर्वपक्षः।। सक्तुनत्वा सक्तयोस्तु संस्कारोपायावद्देव १५

नाभिधानत्वात् प्रगीतेति । सामगानविशिष्टेत्यर्थः । गुणेनेति सहार्थे तृतीया । अभिधानात्मकं स्तवनमित्यर्थः
आज्यशब्दः प्रउगशब्दश्च नामधेयं पूर्वाधिकरणोक्तगुणकर्मत्वापवादार्थं संगतिः । तत्र कारणार्थानीति गुणक
र्मत्वोपपत्तिकथनं । तादर्थ्यात् देवतास्मरणार्थत्वात् । स्तौतिरूपं स्तुतित्वं । तेनेति । नचैवं प्रयाजशेषेण हवींष्यभिघा
रयतीत्यत्रापि तृतीयाश्रुतिबलाच्छेषस्य गुणत्वमेव स्यान्न प्रधानत्वमिति वाच्यं तत्र शेषशब्दबलेन प्रतिपत्तिकर्मत्वे
नात्यर्थावगमात् । इह दृष्टार्थत्वमात्रेण प्रकाशनार्थत्वलिंगादेव प्राप्तिसंभवेन विधिवैयर्थ्यात् लिंगदर्शनमप्याह
एवं चेति । माहेंद्रदेवत्यस्य ग्रहः पात्रविशेषस्थितः सोमरसः । श्रुतिसमवायिनी । शब्दाश्रिता । विधित्वाद्वेनैव० विधिवाक्यग
तशब्देनैवा । निगमेषु इंद्रायेदमित्याद्यभिलापेषु । यत्र क्रतुविशेषेऽनुक्रतुसंबंधबोधकप्रमाणाभावे लिंगमात्रे
णाविनियोगायोगात् कथमुत्कर्षः स्यादतश्चाह मनोतेति । अग्नीषोमदेवत्ये पशौ त्वं ह्यग्ने प्रथमो मनोतेति मंत्रो यथा
लक्षणयाग्नीषोमौ प्रकाशयतीति तथेत्यर्थः । प्रयोजनं तु पूर्वपक्षे उत्कर्षः सिद्धांते नेति स्पष्टमेव । सत्रार्थः स्तुतशस्त्र
स्त्रयोः संस्कारत्वं देवताभिधायकत्वात् याज्यावत् आग्नेयं धर्म स्यात् याज्यामंत्रवदिति पूर्वपक्षः ॥ विधित्वात्तु योरेकु
र्यमेकरणं ध्यानात् । अभिधायकत्वं अनुवादकत्वं न तान् शंतिन दभातीति स्करोनासाममित्रो व्याघिरा दधर्षति देवं श्च

याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सहेति मंत्रः अस्यार्थः याभिर्गोभिर्देवान्यजते याश्च ददाति ता गावो
न नशंति न दभंति न तस्करो दभ्नोति दभ्नोतिर्हिनस्तीत्यर्थः न चासां किंदंग अमित्रः शत्रुर्नो व्यथिर्व्यथा आदधर्षति अभिभव
ति गवां पतिस्ताभिः सह ज्योक् चिरं इदिति निश्चितं सचते संयुज्यत इति तथा हे अग्नीत इति आग्नीध्रस्य ऋत्विजः सं
बोधनं· आग्नीध्र विहर प्रकाशयेत्यर्थः देवानां सदनं स्थानं बर्हिर्दामिछिन्नयीति मंत्रार्थः। आमंत्रणासंबोधने· त्याप्य
साम्पात्सूत्रे मंत्रग्रहणमुपलक्षणमित्याशयेनाह· यस्येति। आभर्य दधि दुग्धं च· आर्त्ति· नाशं· आर्द्धेत्र प्राप्नुयादित्य
र्थः· आख्यातांतरैः ऐंद्रं पंचशरावमोदनं निर्वपेदित्याद्यैः। ननु प्रकृते अनुवंध्यारूपगोद्रव्यकयागे द्रव्ययागयोः प्रा
प्तत्वात्तदनु निर्वाप्य चरुयागे चास्य मंत्रस्य विनियोगात्कथं विधायकत्वमत आह· ओप्यासादिति· पुनः श्रवणारूपा
दित्यर्थः· यज्ञब्दादिभिरिति आदिना आमंत्रणादिसंग्रहः· कथं विधिशक्तिप्रतिबंधकत्वं तत्राह· नहीति। यज्ञशब्दस्य सम
भिव्याहृतगतासिद्धता बोधकत्वादिति भावः· विधात्विति· प्राप्तं तु ननु वक्तुरभावेष्युपचारेणामंत्रणासंभवाद्विधिवशेन च प्रेर
णा बोधसंभवान्न दोष इत्यत आह· विधेश्चेति· एवं निमित्तत्वबोधकपदिन्नाब्दादावपि निमित्तं नैमित्तकभावे नैकवाक्यतो
तानंतुभेदेन विधिः प्राप्तस्येव निमित्तत्वप्रसिद्धिरित्यस्यै· प्रयोजनं स्पष्टं। सूत्रार्थस्तु विधिमंत्रयोरैकार्थ्यं· विधानरूपा

र्थैकवाक्यं विधिप्रत्ययरूपैकशब्दवत्वादिति ॥ तच्चोदकेषु मंत्राख्या ॥ प्रसंगसंगतिं दर्शयितुमाह । आपेति । अत्र हे बुद्धिमे
त्यावसथ्याग्नेः संबोधनं । शास्त्रसंगत्यर्थं वद प्रयुक्तस्येति । वेदवाक्यार्थविचारात्मकशास्त्रे तदुपयोगितया पदा
र्थकथनस्यापि संगतिरिति भावः । प्रयोगकाल इत्यनेन प्रयोगविधिविहितत्वमुक्तं तेन विधिवाक्यव्यावृत्तिः । वाक्यप्र
दनरथघोषादिव्यावृत्तिः । मंत्रकांडसमाम्नातेषु वसंताय कपिंजलानालभेत इत्यादिविधिवाक्येष्वपि वैदिकप्रसिद्ध्या
मंत्रत्वसत्वात्तद्व्यावृत्त्यर्थमाह्वाक्याह । आयिकमिति । आभिमुख्यो वैदिकाः । लक्ष्यत्वान्न मे वात्र प्रयोजनं । सूत्रं तु तेषामनुष्ठे
यार्थंचोदकेषु अभिधायकेषु मंत्राख्येति यथाश्रुतं प्रथमलक्षणे । द्वितीये तु तेषां मंत्राणां चोदकेषु अध्यापकेषु
या मंत्राख्या मंत्रप्रसिद्धिः सैव मंत्रलक्षणमिति व्याख्येयं । शेषे ब्राह्मणशब्दः । एतद्ब्राह्मणानीति । यद्ब्राह्मणानीतराणि
ति शेष इति शब्देन स्पष्टं तेनाय ब्राह्मणानि पंच हविषकानीत्यत्र वैश्वदेविकपर्वगतानि आग्नेयादीनि पंच हवींषि मंत्र
नि एतद्द्विधिकान्यववाहणप्राघासिकानीति वाचनिकातिदेशस्य प्रमेयोदाहरणं स्पष्टमन्यत्र । आम्नाता ते ष्वमंत्रत्वमा
म्नातेषु हि विभागः स्यात् । तच्चोदकेति सूत्रितलक्षणाद्वयं द्वितीयस्यैवमुख्यत्वमिति प्रतिपादनार्थमिदमधिक
रणं । अग्नये जुष्टमिति मंत्रे सूर्यदेवताके हविषि सूर्यपदोच्चारणम् ऊहः । आर्षेयं प्रवरणमिति इति विधिवशादुच्चार्यमाणः का

ऋग्वेदीवे॰रा॰१
७
17

रूपपादिः प्रवरः। यजमानस्यनामग्रहणानीतिविधीयमानेदेवहूतादिनाम॰ मंत्रकार्यमितिमंत्रस्यापिपदकार्यदेव
ताप्रकाशनकरणमित्यर्थः। मंत्रकार्यमिति। एष घोषेणमाहेदृस्यस्तोत्रमुपाकरोतीतिवचनाद्घोषस्यापिस्तोत्रो
पाकरणप्रकाशकतयातत्राप्तिव्यापकलक्षणमित्यर्थः। आग्नेयहेतुरूपपत्तिः मंत्रेति॰ इषेत्वेत्यादेरोषधिनद्धीत्यध्याहा
रात्रस्यापिवेदत्वप्रसंगादितिभावः। तेषामभियुक्तानांमंत्रधीः मंत्रत्वप्रसिद्धिः प्रसिद्ध्याकारमाह॰ मंत्रानिति॰ मंत्रस्यचे
तेषामृग्यत्रार्थवशेनपादव्यवस्था। प्रसंगसंगतिमाह वेदस्यादिना। अर्थवशेनेति॰ समस्तायाऋचोविशिष्टेका
र्थप्रतिपादकत्वेपिअग्निमीळेपुरोहितमित्यवांतरवाक्यार्थवशेनैतावानेवपादइतिव्यवस्था। एतच्चवृत्तवशात्वा
द्युपलक्षणं। तस्यैवमुख्यतयाव्यवस्थापकत्वात्। एतच्चनलक्षणांतर्गतंपादव्यवस्थावत्मंत्रत्वस्यैवानतिप्रसक्तत्वा
दितिबोध्यं। गीतिषुसामाख्या। नागृहीतेति॰ नागृहीतविशेषणाबुद्धिर्विशिष्टेषुजायत इतिन्यायादाक्षेपाधिक
रणोक्तादित्यर्थः। विशेषतोत्रहेतुमाह वचनादिति॰ ककारवत्योऋचः कयानश्चित्र इत्याद्यास्तासुरथंतरंनामसा
मत्रमित्वाअभ्रातृनोनुमइत्यस्यामुत्पन्नंआतिदिश्यतेअथवस्तुवाच्यत्वेअगंतरेपाठोबाधितःस्यादिति॰ तर्हिसाप्रमिकेन ऋम॰
पोनरुक्त्यमतआह इहातिति। मात्रपदेनसामशब्दवाच्याविवेकनिरासः। तथाचतदंशेनुवादइतिभावः। नसत्वानीतप ७

नुसृत्य तात्पर्यार्थं तया ॥ शेषे यजुः शब्दः । प्राप्रिष्टेति । मध्येऽवसानरहितमित्यर्थः । एतच्च स्वरूपकथनमा
त्रं मंत्रजातमिति ब्राह्मणाव्याहृत्यर्थं ॥ निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ संगतिमाह । शेष इति । संज्ञेति । इति संज्ञाभेदा
दित्यन्वयः । विप्रतिषिद्धेति । विरुद्धेत्यर्थः । परत्र स्थापनं परबोधनं कार्यं । मंत्र प्रयोजनं । अर्थवशात् प्रयोजनवशात्
लैंगिकं मंत्रसामर्थ्यरूपलिंगगम्यं । यद्यपि वाक्यलिंगात् दुर्बलं तत्र पांशु यजुषा क्रियत इति उच्चैस्त्वस्य वाक्येनैव विधि पांशुत्व
र्न तु मंत्रस्य । द्वितीयादिरूपायास्तस्या अभावात् तथापि मंत्रगतवाक्यस्य मंत्रलिंगाद्दुर्बलत्वं न तु ब्राह्मणवाक्यस्येत्यभिप्राये तु
वाधः । स्वरूपदुर्बलं । स्वरूपतो दुर्बलं । अंगत्वात् । वर्णितं त्रिष्टाकोपाधिकरणे । वचनस्य उपांशुयजुषेत्यस्य तेनानर्थक्य
प्रतिकूलानां विपरीतं बलाबलमित्यस्यापि न विषय इति भावः । एवं तावदुपांशुत्वविधेर्निगदेषु वाध उक्तः । इदानीं लाघव
सहकृतस्योपांशुत्वविधेर्निगदेषु प्रसक्तिरेव नास्तीत्याह । आपि चेति । लघीय इति । नियतप्राप्तिरूपधर्मेण तात्पर्या
च्च यानियमरूपधर्ममात्रे तात्पर्यस्य कल्पने लाघवादित्यर्थः । दृष्टो देशपकत्वलाघवादित्यपरः । अनुवाद इति । उपांशु
त्वविधिस्तात्पर्यं इति भावः । अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात् ॥ संगतिमाह । आगिति । यजुःपरिमाणं । एताव
द्वि यजुरिति यावदिति । यावत्पदजातं । पदसमूहः । एकप्रयोजने प्रयोजनमत्र कार्यप्रतिपादकमित्यर्थः । तथाच

शाटीवै॰ १ यावतां पदानां संभूय प्रयोजनीभूतैकार्थप्रतिपादकत्वं तावतामेकवाक्यत्वमिति पर्यवसन्नं यथाश्रुते एकस्मिन्नपि वाक्ये
१८ र्थानेकत्वेनासंभवात्। प्रयोजनभूतस्त्वर्थो निर्वापादिर्देवतादिभिश्चैकस्मिन्मन्त्रे एक एव विशेषणविशिष्टः प्रतिपाद्य इति
18 नासंभवः। विभागे विच्छेदे साकांक्षमिति तु अर्थैकत्वगमकतया व्याख्यातेन लक्षणघटकतया भागो वा विभजनं तु यथा वा वि
भजत्विति मन्त्रयोः परस्पराकांक्षाविरहेऽप्यैकार्थप्रतिपादकत्वाभावेन तन्नैकवाक्यत्वे प्रयोजनासंभवादिति ध्येयं। स्योनंते
इत्यादौ तु न सदनार्थकसादनार्थकभागयोः प्रयोजनीभूतैकार्थप्रतिपादकता किंतु लिंगवशेनैकैकस्यैकैकप्रका
शकत्वमेवेति तात्पर्यवशादिति न तत्रातिव्याप्तिः। भाष्ये तु यावतां पदानां प्रतिपाद्यार्थैकत्वं तावदेकवाक्यमिति यथाश्रु
तविभागमन्त्रयोरतिप्रसक्तमतस्तद्व्यावृत्त्यर्थं विभज्यमानसाकांक्षत्वविशेषणमित्युक्तं तन्मात्रं च स्योनंत इत्यादावति
व्याप्तमित्यर्थैकत्वमिति। प्रकृतसंगत्यर्थं सूत्रे वाक्यशब्दः प्रकृतयजुःपर इति सूचयितुमाह। यजुरिति। कथं तर्हि तत्र वा
क्यशब्दस्तत्राह। वक्तव्यत्वादिति। तल्लिंगयजुर्लक्षणमेवैतदित्याशंक्याह। लक्षणादिति॥ वाक्यसामान्यलक्षणमेवैतद्यजुः
परिमाणस्याधिगमकत्वादुक्तमिति भावः। प्रसव इत्यनंतरं त्वाश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामी राम॰
ति शेष इति न्नागच्छतो। सर्वाणीति। निर्वापविशेषणप्रकाशनमुखेनेत्यर्थः॥ शेषे तु वाक्यभेदः स्यात्। साकांक्षं चेदिति पूर्वो १८

घ्रगा मिनोभवथेत्यर्थात् ततः ग्रागिषेवोर्जत्वेयस्यै कमंत्रत्वमित्यर्थः अदृष्टार्थत्वमिति इषेत्वोर्जेत्वेयस्यानुष्ठे२
धिकरणोक्त विशेषणाभावस्य यजुर्वेदकत्वमाक्षिप्य समाधीयत इति संगतिः। प्रागदृष्टार्थेति॰ वायवस्थेत्यग्रे पठितो
मंत्रो वत्सापाकरणे विनियुक्तो दृष्टार्थः वायवइव शीघ्राप्रकाशकत्वात् तत्प्रकाशनस्य दृष्टार्थतावाच्या तत्रादृष्टद्वयक
ल्पने गौरवादेकमेव तत्कल्प्यते तज्ज्ञानं केवच प्रकाशनमेकमेवेषेत्वोर्जेत्वेत्यनाम्नात्क्रियते अदृष्टरूपफलकल्पे द्वारमतार्थप्र
काशनस्यापि तद्दोचित्यात् त्वामितिच शाखायाएकस्याएवोभयत्र बोधनात् एवंचावैर्कल्प्यवकाराद्यध्याहारेणसाकांक्ष
त्वमपि कल्पनीयमिति भावः। नाक्लिप्तेचेति॰ अदृष्टकल्पनालाघवादिति भावः आद्यंतप्रतीकाभ्यामेकस्यैवमंत्रस्योभय
त्रविनियोगसंभवात् प्रकाशनाधिकृत्वावप्यर्थैक्यानपायात् एवमाद्युक्तेवशादृदृष्टादृष्टत्वावपि व्यक्तिभेदमात्रेननुवेजात्यमपी
तित्येयं अदृष्टार्थत्वमभ्युपेत्यतावदाह यद्यपीति नचादृष्टयोरेकजातीयत्वं शाक्यं वक्तुंतथासत्यावृत्तिनैष्फल्यात्॰ एकेनै
वादृष्टेनोभयोपकारसंभवादितिभावः। तद्दृत्तेति पर्वोन्विते॰ विधारिति पंचमी। विधिवशादित्यर्थः तदेवोपपादयति। इषेत्वे
तीति। इतिशब्देनकरणत्वोक्तेरितिभावः। प्रकाशनादन्यतः प्रकाशनद्वारं विज्ञिनेत्यर्थः। ननु छेदनाद्यभिधायिपदाभावाल्ल
का घ्वप्रश्लिष्टकत्वमत आह तत्रेति॰ क्लृप्तिमंत्रेप्यर्थैक्यं नास्तीत्याह नाद्येति॰ स्वरूपतः स्वभावतः। ननु सर्वेषां क्लृप्तिरूपार्थै
कत्वेनाकांक्षापि कल्पनीयेत्यत आह॰ क्लृप्तीरिति। बहुत्ववचनस्यावहुत्वप्रकाशनस्य। क्लृप्तैरेकत्वेतदनुपपत्तेरित्यर्थः॥

शीटीवै०२१
१९
19

भगोवाभित्यत्र तु विभागमात्रे तात्पर्यं न तु विभागानेकत्वे तात्पर्यग्राहकमस्ति येन भगार्यमादिकमप्यात्तन्वा अहं उग्रं वच: क्षु
त्पिपासे त्वेषं वच: उपपातकं वीरहत्यादि महापातकं च हतवानस्मीति नैकविभागभेद: स्यादिति भाव: प्रयोजनमिवै
वेत्पादौ एकस्यैवाप्रयोग: किंतु छेदनेनुमार्जने चैषेत्वोर्जेत्वेत्येतावता: पूर्वपक्षो। सिद्धांते तु विभागेन: कृत्रिमं त्रेतु प्राणाय
त्रैनेत्यं यभागमंत्रेषु सकलावृत्ति: पूर्वपक्षसिद्धांते तन्मात्रस्येति। सत्रे समे षु परस्परानपेक्षतया तुल्यत्वोष्वित्यर्थ:। अनु भगोवा
क्यपरिसमाप्ति: सर्वेषु तुल्ययोगित्वात्। संगतिमाह आत्रापीति। मंत्रार्थस्य। हे अग्ने पाते तु वत्तनु: अपाज्ञ्यपालो हाभ्रिता॥
रजाज्ञ्यार जताभ्रिता: राज्ञया। हिरण्यपाभ्रितावर्षिष्ठा वृद्धतमा गह्वरेष्ठा तीक्ष्णद्व्यवस्था: तथा च आम्नातां अज्ञानाय्या पिपा
से ह वा उग्रं वच: एनश्च वैरहत्यं च त्वेषं वच इति। लौकिक इति प्रभाप्रवृद्धतरो सा स्मान्न पालित्येवमादिरूप इत्यर्थ: नन्वाप्रै
यीन्यायेन प्रकृतस्यैव वैदिकस्योपस्थितत्वाद् ध्याहार: स्यादिति न परिमाणो विशेष इत्याशंक्याह आध्याहार इति। स
माम्नायेन पाठेन न नेतव्य: नेतव्यतया नाभिप्रेत:। आनिबंधन:। स्थानविशेषानियत:। तेनैव निबद्ध: तेनैवान्वित:। न
नुपाठस्य सर्वार्थत्वाभावे यां कांक्षया प्रकृतस्यैव वैदिकतयाध्याहारस्तु चितस्तत्रा हनीयमानो वेति। आनेतर्यं हि मव
धानश्रूयत्वं पूर्वापरयोरविशिष्टमित्याशंक्याह दर्शयति। उत्तरपर्वरूपेत्यर्थ:। एतदेवोपपादयति। द्वितीयस्येत्यादि। सिद्धांत

तया तन्वा अहं उग्रं वच: क्षुत्पिपासे त्वेषं वच: उपपातकं वीरहत्यादि महापातकं च हतवानस्मीति ८

रामः
१९

माहपद्येति। वेदेनेति पूर्वान्वयि। सर्वेषामनंतरदेशेऽनाम्नानात्कथं सर्वार्थत्वमित्याशंक्याह सर्वैति· नर्हि पुनः पुन
राम्नानं कुतो न कृतं तत्राह· बुद्धीति· बुद्धौ विपरिवृत्तिर्विषयता· सकृत्कृतप्रयाजादेराग्नेयादिष्विकोपकारकत्ववद्धि
प्रितं त्रेशेषोपकारकत्वसंभवान्न पुनः पुनराम्नानमित्यर्थः। एतावतैवेति· सर्वार्थत्वांगीकारेणैवेत्यर्थः। निःप्रमाणकः।
नियामकप्रमाणशून्यः। बुद्धिविषयत्वरूपामासत्तिं सर्वान्वये उपपादयति· शक्नोतीति· विपरिवृत्त्यभंगात्। उपास्थि
त्यभंगात्· व्यवहितेति· दृष्टेन गामानयेत्यादौ दंडादीनामानयनाद्यन्वयप्रतीतेः संबंधिपदेनाव्यवधानं वाच्यं एवं च
णामित्यस्यानयनासंबंधित्वाभावाद्व्यवधायकत्वाभाववद्दिष्टा(?)प्यनव्यवधायकत्वमिति भावः। साकांक्षेषु· परस्परसाकां
क्षेषु। भाष्ये अयचेत्यादिनोदाहरणांतरे विचारो दर्शितस्तमाह· यत्रेति· वचनादिति· त्रिभिः पावयतीति वचनादि
त्यर्थः। पवित्रेणोतीति शब्देन वसोः सूर्यस्य रश्मिभिरिति पदानि संगृह्यंते सैवेति· कृष्णीवाचयतीति वत्पावनक्रिया
बहुत्वाश्रवणादिति भावः। तदर्थश्चेति· पावनक्रियासंबंधिकरणप्रकाशनद्वारेणेत्यर्थः। प्रधानवशादि। प्रतिप्रधानं गु ति
न्या णावृत्तिरिति यादिति भावः। वाक्यस्य परिसमाप्तिः पर्यवसानं येन सोनुषंगो भवति· सर्वेषु तुल्ययोगित्वात्। अन्यपका
रणसाम्यादिति सत्रार्थः। वायावायान्नानुषज्यते। अनुषंगस्यापवादात्संगतिः। संततइति। पञ्चाः शिरोऽसद्वयदक्षिणाश्रोणि

शा०टी०वै०श०१
२०

घाज्येनां जनेमंत्रेत्र यमिदं तस्यार्थः हे पशो त्वे वायुः प्राणो बाह्यवातेन संगच्छतां । छंदसि व्यवहिताश्चेत्यनुशासनात् सा
धुत्वं । अंगानि हृदयादीनि यजत्रैः पर्वभिः संगच्छंतां । यज्ञपतिर्यजमान आशिषा फलेन संगच्छतामिति । संयज्ञपतिनेति संय
ज्ञपतिराशिषेति मंत्रेणेत्यर्थः । पर्वत्र । संयजत्रैरिति मंत्रे । तुल्ययोगित्वादिति पूर्वोक्तहेतुप्रत्युदाहरणं कथनात् संगतिं स्व
यमुत्रार्थमाह । सर्वत्रेति । प्रयोजनं सर्वत्र मंत्रत्वे सति मंत्रस्य निमित्तप्राप्याश्रितं त्वमंत्रत्वे त्वन्यदिति ज्ञेयं ॥ ॥ इति श्री
मन्त्रात्सद्रामचंद्रात्मजनत्सदैवनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां द्वितीयाध्यायस्य प्रथमः पादः संपूर्णः
॥ ॥ शब्दांतरे कर्मभेदः कृतानुबंधत्वात् ॥ अवसरसंगतिमाह । यजतीत्यादि धात्वर्थभेदानुनिष्पाद्यपूर्वभेदासिद्धेः
भावार्थाधिकरणमपूर्वाधिकरणं चोपोद्घातः तेन प्रसक्तैकापूर्वमस्तिकुतेति विवेचनं तदनुप्रसक्तं मंत्रगताख्यातनिरूप
णादीत्यर्थः । कर्मभेदो । भावनाभेदः । प्रथममिति । धात्वर्थभेदस्य मतांतरसिद्धतया भावनाभेदमात्रे शब्दांतरस्य व्यापारत्वस्
चीकर्तृहन्यायेन निरूपणमिति भावः । एकेति । ज्योतिष्टोमप्रकरणेत्यर्थः । एतच्च प्रकरणांतरे सति तस्मादेव भेदसिद्धिरि
तिशंकाव्यावृत्त्यर्थं । जानाति बुध्यत इत्यादीनामर्थैक्येपि शब्दांतरत्वात् तद्भावर्तनाय पर्यायेति । धातुभ्यो निष्पन्नानि । प्र
युज्यमानानि । शब्दांतरमित्येकवचनं शब्दांतराणां प्रमाणमित्यभिप्रायं श्लोकं व्याचष्टे । फलेति । फलनाशपत्वादित्यर्थः । तस्मा

रा०म०
२०

पु दिति॰ कल्पनालाघवादित्यर्थः । अयमाशयः यद्युत्पत्तिशिष्टैकधात्वर्थविशिष्टभावनायां वाक्यान्तरेणाधात्वर्थान्तरं न विधा-
नुशक्यं तथापि अनेकादृष्टकल्पनागौरवपरिहारायैकवाक्यत्वे योगीकार्ये आख्यातभेदेपि षष्ठ्वाद्याधभावेपि चार्धमंतर्वेदि मि-
नोत्यर्धं बहिर्वेदि मिनोतीत्यादौ तयोगीकारात् । एवं च सर्वेषामुत्पत्तिशिष्टत्वान्न दोषः । यद्वा उत्पत्तिशिष्टोमेन स्वर्गकामो य-
जेतेति फलवाक्ये स्वर्गोद्देशेन श्रुता भावना विधीयते न तु धात्वर्थोपि तस्य वाक्यान्तरात्प्राप्तिसंभवेन विशिष्टविधिगौरवा-
नंगीकारात् तां च भावनामाख्यातांशेनानूद्य यजत्यादिपदैर्यागाद्यो विधीयन्ते फलवाक्ये यजतिरवश्यमुत्पानुवादः सर्वो-
पलक्षणार्थं वेति न भावनाभेद इति॰ वाचकशब्दैक्यादपि न भावनाभेद इत्याह किंचेति॰ भावनायाः प्रत्ययवाच्यत्वाभावेन दे-
कत्वस्य न भावनैक्यप्रयोजकत्वं स्यादतः प्रत्ययार्थत्वोक्तिः पुनरुच्चारणानुकवलायाः प्रकृते॰ प्रयोगासंभवादिति भावः ।
उत्तरार्धं व्याचष्टे यदिहेति॰ तेषां॰ धात्वर्थानां । धातुभेदेन॰ उपादीयमाना विधीयमाना॰ विधेतेति॰ विहितायां विधानायो-
गादिति भावः । तत्तदर्थेतीति तत्तद्धात्वर्थभेदमनुसारितोत्यर्थः । कृतिरूपाया भावनायाः सविषयतया विषयभेदेन तत्तद्धात्वर्थ-
प निरूप्यतया तद्भेदादवश्यं भावनाभेदः सिध्यतीति भावः । युगपदनेकविषयत्वानादिवदनेकधात्वर्थावच्छिन्नैकभावनास्वी-
त्याशंक्याह निष्पद्येतेति । अयतेति परान्वितं । अपवदिति । यथा क्रयः सर्वैरारुणादिभिर्विशेष्यते तद्वदित्यर्थः । धातुभिर्धी-

अपर्यायधातुभेदेन ४

शाटीवै२१ २१ त्वर्थैः। तथा चानेकधात्वर्थविशिष्टैकभावनाबोधकशब्दाभावान्न भावनैक्यमित्यर्थः। द्वंद्वोत्पन्नस्य तु बह्वर्थत्वेकपदोपात्तत्वं क्री
णातीत्यैकवाक्योपात्तत्वमेकस्यानेकवैशिष्ट्ये हेतुरिति दृष्टान्तवैषम्यमुक्तं वाक्यान्तरोपात्तस्यापि वाक्यान्तरे निवेशमाशंक्या
ह तथाहीत्यादि। भिन्नवाक्यतायाः स्पष्टत्वादाह· प्रकरणेनैवेति· श्रुतिनः एकपदरूपश्रुत्यपेक्षया· विरोधाभावे दुर्बलस्यापि
बाधायोगादाह· करणांशेति· नापेक्ष्येति· यजतीति पदे न दानहोमादिनिरपेक्षस्यैव यागस्य भावनाकरणत्वस्य प्रतीयमान
स्य बाधापत्तेरित्यर्थः। फलवाक्येषु भावनाविधानपक्षस्यासंभवं दर्शयति· अचार्यमाणएवेति· भावनायाः सविषयत्वा
दित्याशयः। प्रयोजनं पूर्वपक्षे दानहोमादीनां सर्वेषां प्राधान्यं सिद्धान्तेतु सोमयागांगत्वेति· सूत्रं तु शब्दान्तरे कर्मभेदो भावना
भेदः कृतानुबंधत्वात् धातुना कृतत्वबंधत्वादिति व्याख्येयं॥ एकस्यैव पुनः श्रुतिरविशेषादनर्थकं हि स्यात्॥ धातुभेदे भाव
नाभेदस्तदभेदे तु नेति प्रायुदाहरणसंगतिः॥ विधेरिति· अविशेषेण कार्यविशेषं विना। एतच्च दध्ना जुहोतीत्यादौ दध्यादि
गुणादिविधिपरे विधावति प्रसंगनिवृत्त्यर्थमा यप्येति· आदिना तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजती
ति वाक्यानि गृह्यन्ते· एत एव पंच प्रयाजाः· प्रत्यभिज्ञानात्· स एवायं यजतिरिति अभेदग्रहात्। उक्तां संगतिं दर्शयन् पू राम॰
र्वपक्षमाह· प्रत्ययार्थेति· आपेक्षेति ज्योतिष्टोमसंज्ञकयागाङ्गत्वेति· संज्ञकस्य पश्यामेदः एकस्यैव संज्ञाद्वयानुपपत्तेस्त २१

द्वदित्यर्थः। समिधःशब्दावरुद्धस्येति· प्राथमिकत्वेन समिद्वाक्यैककर्मविधिः समित्पदं च तन्नामधेयं तनूनपादादयस्तु तत्रैव देवता
रूपगुणविधायका इत्यर्थः। कथं तर्हि सिद्धान्तेपि तेषां नामत्वसिद्धिरित्याशङ्क्याह· यदि हीति· तर्हि नाम्नामभेदासिद्धिः क्वापि नस्या
दत आह· यत्त्वित्ति। अधिकारार्थाद्यपेक्षयैव ज्योतिःशब्दस्यानुष्ठेयकर्मवाचित्वं प्रसिद्धमिति भावः। ननु मन्त्रवर्णप्राप्त
देवतारूपगुणयोगेन नामधेयत्वं समिधादस्योपपद्यते· वसन्तमृतूनामित्यादिमन्त्रवर्णेन वसन्तादिदेवतानामपि प्राप्त्या दे
समिद्देवताया नित्यमप्राप्तेस्तन्नियमविधायकत्वमेव समित्पदस्य वाच्यं एवं चोत्पत्तिशिष्टदेवतावरोधेन तनूनपादादिदेव
ताविध्यसंभवात्कथं गुणविधित्वेन पुनःश्रुतेः सार्थक्यमत आह· समपीति· आनर्थक्याविधायकतया सार्थक्याभावे
नदोषः· नाप्रामाण्यं· प्रयोजनवशेन· विधायकत्वरूपमुख्यप्रयोजनवशेन· अपमाशयः आवैकत्वेनाभेदनिर्णयेए
कमेव विधायकं वाक्यचतुष्टयं तु एकं वर्णीतेद्वौ द्वेणीत इत्यादिवत् स्तावकतयार्थवाद इति· सिद्धान्तमाह· विधेरिति। स्व
भावः स्वरूपं। अप्रवृत्तस्य पुरुषस्य प्रवर्त्तनं प्रवृत्तस्य प्रवर्त्तनासंभवादिति भावः। प्रवर्त्तनविषयमाह धात्वर्थेति· भावो भा
वना। अर्थः समानपदश्रुत्या एवकारेणोपपदार्थव्यवच्छेदः। गत्यन्तराभाव एव तत्र विध्यंगीकारः तत्र· विधिश्रुत्यनुरोध
त्वेनैवानर्थक्याभेदप्रत्यभिज्ञा गुणविधानार्थत्वरूपपूर्वपक्षहेतुत्रयं क्रमेणादूषयति· यत्त्वावदित्यादिना। तत्र बलवै ते

शाटीवै०२१ वत्कारणांतरं । विकल्पवाक्यभेदादि । विधिश्चेत्याविति । अप्रवृत्तप्रवर्त्तनारूपस्य विधेः प्राप्तविषयाद्वेदबोधकत्वमितिभा
२२ व । दध्ना जुहोतीत्यादौ संनिहितेदध्यादिविधिकत्वमनूनपादादिविधिः कुतो नेत्याशंक्याह । यदिहीति । आनर्थक्यप्रतिहतानां
22 विपरीतं बलाबलमितिन्यायेन दध्यादेः स्वरूपविधेः फलेस्वलाघवार्थमेव विधिर्दुर्वलमपि संनिधिकर्मानुवादाद्यानुमन्यत इ
त्यर्थः । प्रकृते तु नैवमित्याह । यद्याविति । मंत्रवर्णाः मंत्राक्षराणि तनूनपादग्न आज्यस्येत्यादीनि । अनुवादत्वेन वेत्यनास्था
वादो नामधेयत्वमिति पक्षस्याभ्यासस्य भेदकत्वसूचनार्थः । प्रयोजनं तु सकृदसकृदनुष्ठानरूपं स्पष्टमेव । एकस्य पुनः श्रु
तिरप्येवं त्र्यावृत्तान्तरवत्कर्मभेदिकेत्यर्थः । कुतः अविशेषात् गुणफलादिरूपविशेषाप्रत्वाभावादनर्थकं वाक्यं हि स्यादि
तिसूत्रार्थः ॥ प्रकरणांतु पौर्णमास्यां रूपावचनात् । संगतिमाह । दक्षीमिति । अष्टसु कपालेषु भर्जनसंस्कृतः पुरोडाशोष्टाकपा
लः अच्युतः अलुप्तः । आज्यस्यैकदेशेनानेनोपांशुयजनं यजेत्यर्थः । ताभ्यामाग्नेयाग्नीषोमाभ्यां प्राप्य[illegible]तदेतेवान्य । इद्रः । एवं छ
च पौर्णमास्यामाग्नेयोपांशुयाजाग्नीषोमयागत्रये । अमावास्यायामैन्द्रदधिपयोयागो पूर्वोक्त आज्यपश्चेति षट्प्रधा
नयागाः समप्रधाना इति । समं प्रधानं फलं येषां त इत्यर्थः । इति संप्रयुक्तौ । एतस्य दसमपिव्याहृतौ । तन्निमित्तेनेति । कालसं रांम०
योगेन निमित्तेन प्रसिद्धनामधेयत्वमयोत्साम्यामित्यर्थः । रूपं द्रव्यदेवतात्मकं वा[illegible]ति । हत्र इहगुणकाग्निसोमप्रकारा २२

केन्नचौत्रमग्निर्वृत्राणि जंघनत इत्याग्नेयी· त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहेति सौमी वृधन्वती वृधन्वत्कुर्णा काग्निसोमप्र
काशिके अग्निः प्रत्नेन मन्मनेत्याग्नेयी· सोम गीर्भिष्ट्वा वयमिति सौमी एवमुदाहृतेषु वाक्येषु मुख्यविचारविषयं दर्शयति· अ
त्र चेति। असंयुक्तोत्पन्ना कार्यविशेषणं संबद्धं सदुत्पन्ना चतुर्वीरग्रहणसंस्कृतत्वेनावगता ध्रुवा पात्रविशेषस्त उक्ता मांत्र
वर्णिकीति। मंत्रप्रकाशयाग्निसोमरूपेत्यर्थः। एवं प्रकृताधिकरणपूर्वपक्षमुक्त्वा तत्फलीभूतं विचारमाह· यदेति· आख्यातय
जिपदं अवष्टभ्य यागांतरं म्योव्यावर्तयितुमलं समर्थमित्यर्थः अप्रसिद्धत्वात्। अप्रसिद्धार्थत्वात्। एतदेव दर्शयति सिद्धकालेति॥ द
र्शपूर्णमासीरूपेत्यर्थः। उत्पत्तौ· उत्पत्तिवाक्ये। आज्यभागौ यजतीति· समुदायद्वयेति· दर्शत्रिकपूर्णमासीत्रिकरूपेत्य
र्थः। एकपदबोध्यतया हि बहूनां समुदायव्यवहारः साकं पूर्ववाक्ये युष्मांश्चिदुत्वात्मिन्नेव फलवाक्ये एकेन यजिनोपादानादि
ति विकल्प्य दूषयति· समुदायो हीत्यादिना· अस्य पक्षे लेक एव समुदाय इति द्विवचनानुपपत्तिरित्याह· राजसूयवदिति। इष्टि
पशुसोमयागानां बहूनां विकृत्य राजा राजसूयेन स्वाराज्यकामो यजेतेत्येकेन यजिना समुदायाभिधानात् यथा राजसूयेनैक
वचनं न तु बहुवचनं तद्वद्धि हाप्येकवचनमेव स्यान्न द्विवचनमित्यर्थः। ननु दर्शपूर्णमासेति नाम द्वयोपात्तत्रिकसमुदायद्वय
सिद्धेर्द्विवचनोपपत्तिरिति शंकते नचेति। यजिसामानाधिकरण्येन तन्मात्रनामत्वस्यैवावगत्या त्रिकनामत्वस्यैवासिद्धिरित्या ये

शा०दी०वै०२।१ ह॰ नयोरिति॰ आख्यातं तु न समुदायद्वयस्यैकमेवायुगपद्वा प्रतिपादने समर्थमित्याह न चेत्यादि॰ बहूनिति॰ अविशेषेण
२३ प्रकृतसर्वयागानित्यर्थः पूर्वपक्षमुपसंहरति॰ अत इति यथाऽप्रसिद्धार्थेन राजसूयनाम्नान यजेर्व्यवच्छेदस्तथात्रापीत्यर्थः।
कथं तर्हि नामधेयस्याद्विवचनान्तस्य सर्वयागपरत्वं तत्राह नामधेयमपीति॰ सिद्धान्तमाह॰ कर्मान्तरेति॰ पौर्णमास्यमावास्यासं
युक्तयोरिति शेषः। इमौ॰ विद्वद्वाक्यगतौ यजती॰ कथंचिदिति सर्वस्मैवेति वाक्येन कल्पितविधिकेनेत्यर्थः। मंत्रवर्णात् अ
ग्निर्वृत्राणीत्यादिमंत्रवशात्॰ आज्यभागांगत्वे किं प्रमाणं तत्राह लिंगेति॰ आज्यभागयोरग्नेः सोमस्य च देवतात्वात् तत्प्रकाशन
सामर्थ्यरूपेणेत्यर्थः। क्रमः संनिधिः। कथं तर्हि वार्त्रघ्नी पौर्णमास्यामित्यादिवचनं तत्राह॰ वचनं त्विति। वार्त्रघ्नीवृधन्वत्योर्म
ध्ये एकेनैव युगलेन देवताप्रकाशनसिद्धेर्व्यवस्थितो विकल्पः प्राप्तस्तत्र पौर्णमासीकालिकयोर्वार्त्रघ्नी अमावास्याकालिक
योर्वृधन्वतीति व्यवस्थार्थं। ननु पौर्णमासीसंज्ञके कर्मणि अमावास्यासंज्ञके च त्वदुक्तो मंत्राणामपूर्वविधिर्गौरवादित्यर्थः।
तादृष्ट्या बाधेन॰ आज्यभागांगत्वाबाधेनाल्पपक्षे तु न दृष्टो दोष इति भावः। ननु यागस्य देवतां विनानुपपत्तेर्या काचिद्देवताक
ल्पनीयेत्याशंक्याह॰ न चेति॰ अव्यवस्थितानुष्ठानानुपपत्तेर्विधिप्रमाणिकैव देवता भवतीति भावः। अन्ये न त्विति॰ पौर्णमास्य रा०म०
यतित्वतीयपयाकरणत्वेनानुवादात्तस्य च साहित्येनैव फलवाक्यादवगतेः सहितेष्वेव कालांगतया विधीयत इति वक्ष्यत इत्यर्थः। २३

प्रकारांतरेणेति। रूपत्वाममात्रांशक्येति त्रोषः। इव्यदेवतासंयोगादिति। आग्नेयवाक्यस्याहि यागविधायकत्वे ऽभ्युपगते एव सत्यां
ग्निदेवतायाश्चाष्टाकपालद्रव्यसंबंधस्यान्यथानुपपत्त्यापाकस्यनीयः स्यात्र च अभ्युपगतसंभवे ऽभ्युपगतकल्पना युक्तेत्यर्थः। असकृच्छ्रु
तेरिति। आवृत्तिप्रसंगादित्यर्थः। ननु सर्वत्र विशिष्टभावानां विधेरायाणां निहोत्राधिकरणोक्तस्य भाणत्वात्र वाक्यभेद इत्याशं
क्याह। भावनेति। प्रतीतिं तस्य पाले पितात्पर्यत्तोऽप्राप्तविषयत्वात्प्राप्तो देशो नाप्राप्तमेकमेव सकृदुच्चरितेन विधानव्याप्ति
त्यर्थः। तादर्थ्यसंगागिभावस्तद्देदेनेत्यर्थः। तद्देशः। तत्समीपवर्तीतत्समानाधिकरणो वा। तस्यैकस्यात्ति। अप्राप्तस्यैकमेव एकस्य
त्यर्थः। अनेकेति। यथात्रैवाग्निदेवताष्टाकपालद्रव्यपौर्णमास्यादिकालरूपानेकगुणविशिष्टापूर्वयागस्यैकस्याभ्युपगतेन विधि
ना विधानेन तदर्थायत्यैव विशेषणानां विधिकल्पनानभ्युपगतस्यावृत्तिरित्यर्थः। विशेषणपर इति। विधिरिति शेषः। इतरान्वाद्दे
यादिति। गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति न्यायेन। विशेषणानां परस्परवैशिष्ट्याभावेनैकविधिनेतरविधानादे
यादित्यर्थः। तत्रापि। विशेषणांतरेपि। इदानीं येषां विशेषणानां प्राप्तकर्मानुवादेन विधानेपि न वाक्यभेदस्तानि प्रकृतेन
द्वैधमर्थप्रदर्शनायोदाहरति। विशेषणान्यपीत्यादिनानच्चारणापत्तिरित्यंतेन। विशेषणानां परस्परवैशिष्ट्यशाब्दगम्यप्रमाणा
न्तरासिद्धं वा चेष्टितं अन्यथा कर्मसंबंधविधानायोगात् वैशिष्ट्यस्य चिचित्तस्य कर्मसंबंधविधिश्रुतिवाक्यभेदात् अतस्तदुभयप्र

शाटीवै२१
२४
24

दर्शनं।क्रियान्वयादिति॰ कारकत्वाभावेनक्रियायांप्रथमतोन्वयस्यानपेक्षणादितिभावः।अभ्युदितेष्टिर्नाम षष्ठे ३ उदा
दाहृष्यते॰ सोदिष्टाःस्तन्मासंडलाःशिपयोत्तनत्क्रमम३च्यतेनैराविष्टोभवतीतिनिरुक्तव्याख्यातार्थेत्रिपिविष्टइतिविष्णु
विशेषणंग्रन्ते॰ दुग्धे॰ ऋत्येव॰ऋतैव॰सामानाधिकरण्यंअभेदान्वयंषष्ठ्युदाहरणंतुतस्यद्वादशरात्रंदक्षिणेतिजेमं
अत्रहितस्यगोर्द्वादशरात्रंदक्षिणोद्देशेनविधीयते।प्रकृतेतुनैवमित्याह॰ अत्रत्विति।इतिसामानाधिकरण्यलक्षणा
इत्यन्वयः।संनिहितेति॰ अग्निर्देवतास्येतिसर्वनामार्थतद्धितविधानात्सर्वनाम्नश्चसंनिहितवाचित्वादितिभावः।वा
क्यमेदंदर्शयति अष्टाकपालआग्नेयःकर्त्तव्यःसचेति॰इदमुपलक्षणंअष्टाकपालःकर्त्तव्यःसवाग्नेयःकार्यःसचपौर्णमास्यामि
तित्रिणष्टत्रिवोध्यम्।सत्रार्थस्तुपौर्णमास्यांतदुपलक्षितेवाक्यद्वयेप्रकरणमेवप्रकृतकर्मवाच्यतेतनुकर्मान्तरविधानंरूपस्यद्र
व्यदेवतादेरवचनादिति॰ पौर्णमासीवदुपांशुयाजःस्यात्।जामित्वतिः यजस्यसंबंधिजामिसदृशंआलस्यावहं॰ अन्वेवौ॰ अव्यव
हितौ॰पुरोडाशौ।आग्नेयाग्नीषोमीयौ।अन्तरा।पुरोडाशद्वयांतराले।लिंगक्रमाभ्यामिति।लिंगंदेवताप्रकाशनसामर्थ्यंक्रमः
स्थानं साम्यं।सामर्थ्येति॰ अंतरावाक्येदेवतायाअविधानेनतदीयदेवताप्रकाशनसामर्थ्यस्याज्ञानादित्यर्थः।अरूपःसन्निति॰ रामः
उपांशुयाजमंतरायजतीत्यत्रयजतिरितिशेषः।विष्ण्वादिश्रवणंविष्ण्वादिवाक्येदशमेति॰ दशमोपान्त्याधिकरणेमंत्रेत्रयोक्तदेव २४

ताऽत्रपक्षेउपांशुयाजेविकल्पाभिधानादित्यर्थः।ध्रौवंचेति।सर्वस्मैवाएतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्यमित्यनेनविहितमित्यर्थः।
पूर्वपक्षमाह।तत्रेति।उक्तसंज्ञायेसतीत्यर्थः।तद्यस्यप्रैषातिसर्गप्राकालेषुकृत्याश्चेतिसूत्रेणप्रैषार्थविधानात्तस्यचप्राप्त
विषयप्रवर्त्तनरूपस्येहाप्राप्तविषयत्वेतासंभवात्स्वाध्यायोऽध्येतव्यइतिवद्विधौत्वसगुणयागविधायकत्वंनिःसंदिग्धमित्यर्थः।अ
त्र।अन्तरावाक्ये।वर्त्तमानापदेशतः।वर्त्तमानबोधकेलट्प्रत्ययवशात्।ननुवैश्वानरंद्वादशकपालंनिर्वपेत्पुत्रेजातइत्युप
क्रान्तापाजातेष्टेरेवयस्मिन्जातएतामिष्टिंनिर्वपतीत्युपसंहारएतन्मध्यगतितानांयदष्टाकपालोभवतीत्यादीनांतदेकवा
क्यत्ववत्।जामित्वाजामित्वोपक्रमोपसंहारमध्यवर्त्तिनांविश्वादिवाक्यानामपितदेकवाक्यत्वमेवोचितंननुतद्वदेतद्विधायक
कैकत्वमित्याशंक्यदृष्टान्तवैषम्यमाह।वैश्वानरेति।पुरुषव्यापारोभावना।गुणफलेति।अष्टत्वादिगुणस्यब्रह्मवर्चसादिफले
विधानमित्यर्थः।प्रत्येकमिति।एकवाक्यत्वेसकृदेवजामित्वश्रवणंस्यादितिभावः।तर्हिजामिवेत्येतदपिप्रत्येकंवक्तुमुक्तमि
त्याशंक्याह।जामिवेति।तेषां।विश्वादिवाक्यानां।एतद्विचारस्यपूर्वपक्षोपयोगितामाह।सतित्विति।नचसमुदायानुवाद
स्यानर्थक्यं।तस्यान्तरालकालविधानार्थत्वात्।नचैवमुपांशुयाजपदेनोपांशुत्वगुणविशिष्टान्तरालतिथिश्चेतिवाक्यभेदइति
वाच्यं।उपांशुयाजपदस्यरूप्यैवसामानाधिकरण्यवशेननामधेयत्वात्।अन्यथाव्युत्पत्त्यंगीकारेवज्रोःकुधिरापतनोरितिकुलाप

शा॰टी॰वै॰ २१
२५
25

त्रैः। जामित्वेति· जामित्वोपक्रमाद् जामित्वोपसंहृतेश्चैकं वाक्यमित्यन्वयः। वाक्यशेषेति। जामित्वेत्यादिदोषकीर्त्तनस्येत्यर्थः।
अंतरालवाक्यस्य यागविधित्वे गमकांतरमाह आनर्चीनेति· पुरोडाशाद्रूपमैरं नर्चेत्यर्थः। तेनावगतो योंतरालसंपृक्तः कर्मा
लरविधिः स तत्रैव तिष्ठित इत्यर्थः। प्राशिशंसिषितं। प्रशंसितुमिष्टं· किं त्विति किंरूपमित्यर्थः। विष्ण्वादिवाक्ये कर्मविधावर्थ
वादासंगतिमाह अंतराले चेति· उपांशुगुणक इति· न वैवं सति कुत्वापत्तिः दृष्टानुविधिश्छंदसीति छांदसत्वेन नत्वमावे
पि साधुत्वोपपत्तेरिति भावः। प्रयोजनं समत्रार्थश्चास्पष्टः॥ आघाराग्निहोत्रमरूपत्वात्। संज्ञेति· अग्निहोत्राघारपदयोस्त्व
स्वान्यापेननामत्वस्य साधितत्वादित्यर्थः। इत्यादीनीत्यादिपदेन पयसा जुहोतीत्यादीनां संततमाघारयतीत्यादीनां च सं
ग्रहः। होमाघारा इति। होमाश्चाघाराश्चेत्यर्थः। पूर्वाधिकरणे वाक्यभेदपरिहाराय तत्वप्रत्ययमुक्तवाक्यानामर्थवाद
त्वमुक्तं इह तु दध्यादिवाक्यानां विधित्वस्योभयवादिसिद्धत्वाच्छुद्धगुणविधेश्चावक्ष्यमाणरीत्या असंभवाद्रवश्यं विशिष्ट
विधिरंगीकार्य इति प्रत्युदाहरणसंगतिः। पूर्वपक्षे फलमाह· तदर्थामिति· पूर्वपक्षमाह· तत्रेति। अनयोः अग्निहोत्राया
रवाक्ययोः। अनुवादतः। अनुवादेन· यतो गुणपात्रमप्राप्तं कर्म ततो न विधानं न्याविधानार्हमित्यर्थः। श्लोकं व्याचष्टे· राम॰
अग्नीति· सामान्यस्यज्ञातत्वेन प्रवर्त्तनायोग्यत्वेन च विधानायोग्यत्वमित्याशयः। अनुरंजकं विशेषणं द्रव्यदेवतादि। अनिरू २५

पित्तः। अनिरोधितः। संज्ञया विशेषावगतिमाशंक्याह तत्प्रयेति। विशेषावगतौ तस्यैव संज्ञेत्यवगमः संज्ञावगतौ च विशेषावग
म इत्यन्योन्याश्रय इति भावः। गुणविधाने गुणमात्रविधानं। द्वितीयश्लोकार्थमाह। अपि चेति। अत्र। अग्निहोत्रादिवाक्ये॥
अप्रमावः विशेषणनिर्द्धारणहेतुरूपापरिज्ञाने विध्यनंगीकारे दध्यादिवाक्येपि देवतापात्रज्ञानालक्ष्यं विधिः स्यादतो विधिव
शादेव कश्चित्तविशेष इत्यवगम्यत इत्यपश्यानुवाक्यांतरेण तत्पर्यवसानमित्यंगीकर्तव्यमिति। असोऽचेतनः स्वव्यापारे हि पुरुषे
ति पुज्यत इति स्यापादित्यर्थः। अन्यत्रोपि। दध्यादिवाक्येष्योपि समुदायेति। तत्र योजनं तु सर्वप्राकरणिकहोमानामग्निहोत्रना
मत्वावगमेन फलवाक्ये सर्वेषां ग्रहणं। अन्यथा प्रसिद्धाग्निदेवत्यस्यैव फलवाक्ये ग्रहणं स्यात्तत्र सूर्यादिहोमानामप्रीत्याग्नि
होत्रत्वे। आघारस्थले तु ऊर्ध्वमाघारयतीत्यादिवाक्यविहिताघाराणां समुदायस्याघारनामत्वावगतौ तत्राम्नात दुद्देशने
द्रुऊर्ध्वो ध्वर इत्याघारमाघारयतीति मंत्रविधिः। अथवा चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्येतिवाक्येन प्रयाजार्थचतुर्गृ
हीताज्यसंस्कारकत्वेन सर्वाघारविनियोग इति भावः। वाक्यतरप्राप्तसंनिहितकर्माभावान्नाग्निहोत्रादिवाक्यस्यानुवादत्वमिति
सिद्धांतमाह। प्रकृते त्विति। दध्यादिवाक्यैः कर्मप्राप्तिमात्रं क्रियते न करोतिः। नहीति। दध्यादिभिरणक्षिप्राधात्वर्थादुत्तार्यस्वमात्रविष
यत्वेन बोधिता शक्तिर्यस्येत्यर्थः। इतरत्र। अग्निहोत्राघारवाक्ययोः। श्लोकं व्याचष्टे दमेत्यादिः। अनेकं दध्यादिहोमाघाररूपान्

शा०दी०वै०श०१ दुक्तं सर्वत्राख्यातसंबद्धेश्वर्यमाणोपदान्तरेविधिविशत्वुपसंक्रान्तेः स्याद्धातोरनुवादत्वेति· रूपकृतविशेषानवगमेकथंकर्मविधि
२६ रत आह· पयपीति। तत्राग्निहोत्रादिवाक्ये। न धात्वाक्षिप्तः सामान्येन लक्षितः। एवंचान्योन्याश्रयपरिहाराद्धिधावत्तविशेषस्ये
वनामधेयपग्निहोत्रादिपदमित्याह· लक्षितेति· एतावतापिकथंरूपलाभस्तत्राह· तस्यवेति· आदिनापदग्रयेचेत्यादिदे
26 वताविधिसंग्रहः। क्रियापदगतस्यविधेः कथंकेवलदध्यादिविधानबोधकत्वमतआह· स्वरूपेणेति· क्रियासंबंधरहितमित्य
र्थः। व्यापारविशिष्टधात्वर्थावच्छिन्नभावनाविशेषणं। ननु क्रियायां· प्राप्तत्वेनाविधेयत्वात्कथंदध्यादिविशिष्टहोमविधिर्व
क्तुं शक्य इत्यतआह पयपीत्यादि· फलतः। तात्पर्यतः। अत्र· दध्यादिवाक्ये। प्रयोजनं नुपूर्वपक्षे दध्यादिदशद्रव्येर्दश
प्रक्षेपाः कथंचिद्यदग्रयेचेतिवाक्यस्थदेवतापदानुषंगेणयागरूपत्वसंप्रतिपत्तदेवताकत्वेनयुगपद्दशद्रव्यकहोमानु
ष्ठानं· सिद्धान्ते तु विकल्पेन दध्यादीनामनुष्ठानमिति· आघारवाक्येतुपूर्वपक्षे ऊ ऊर्ध्वत्वादीनामध्येयस्यैवदेवादंतरायस्त
स्येवावृत्तिः। सिद्धान्ते तु गुणलोपमात्रमितिमित्तं प्रायश्चित्तं न तु तदनुरोधेन प्रधानावृत्तिरितितेषां न च पूर्वपक्षेपिसारणस्यनिष्पन्नत
त्वात्रावृत्तिरितिवाच्यं ऊर्ध्वत्वविशिष्टविजातीयक्षारणक्रियाया अनिष्पन्नेरिति: स त्वार्थस्तु आघाराग्निहोत्रवाक्यमरूपत्वा रा०म०
त्समुदायमानुवाद इति॥ ॥द्रव्यसंयोगाच्चोदनापशुसोमयोः प्रकरणेत्वनर्थको द्रव्यसंयोगोनहितस्यगुणार्थेनाहदयस्यैन्य २६

पादानत्वसंबंधे षष्ठी। आग्नेप्रथमोऽइंद्रवायुदैवत्यं सोमरसं ग्रहाख्यपात्रे गृह्णातीत्यर्थः। कर्मणां समुदायस्येत्यन्वयः॥
तत्रैंद्रवायववादिवाक्येषु देवतातद्धितवशाद्यागविधिपूर्वपक्षस्य सुकरत्वमभिप्रेत्यादौ तत्र विचारं दर्शयति तदर्थं चे
त्यादिना। गृह्णातौ। ग्रहणमात्रे। देवतानन्वयस्तीत्यर्थः। यागादन्येनेति। त्यज्यमानद्रव्योद्देश्यत्वरूपदेवतात्वस्य यागं
विनानसंभव इत्यर्थः। असिद्धत्वादिति द्रव्यदेवतासंबंधस्य यागघटितत्वेन यागात्पूर्वमसिद्धत्वादित्यर्थः। उद्देशेति त
थ्यावेंद्रवायुद्देश्यकग्रहणकर्मत्वमेव संबंधस्तद्धितार्थ इत्यर्थः। मरुत्वतीयेति। द्यावापृथिवीशुनासीरमरुत्वद
ग्नीषोमवास्तोष्पतिगृहमेधाच्छ चेति देवताधिकारपठितेन सूत्रेण तत्रैव छप्रत्ययविधानादित्यर्थः। अनिरूपितेति। अनि
र्णितविशेषेत्यर्थः। यजेतेति यजिरित्यन्वयः। तत्रैव यागसमुदाय एव गृह्णातिनेति। ग्रहणसंस्कृतेनैंद्रवायुदेवताकेन द्रव्ये
ण। यजेतेति द्रव्यसामान्यावगतौ केन द्रव्येणेति विशेषाकांक्षायां सोमेनेति विशेषविधिरित्यर्थः। नन्वराव्याघारयागं गृह्णा
तीति सन्निहितवाक्येनाघारयाग्रहणविधानात् द्रव द्रव्यमेव तत्र प्रतीयते न तु सोमस्तधारयाग्रहणसंभवादिति कथं
सोमविधिरत आह। यद्वेति। आग्नावीस्तृह्मा। व्रीहिभिरिति। यथाग्नेयोऽष्टाकपाल इति पुरोडाशप्रकृतिभूतद्रव्यापेक्षायां व्रीही
णां विधानं तद्वदित्यर्थः। उक्तदृष्टान्तवैषम्यं शंकते नन्विति। पुरोडाशवत्। आग्नेयमवीक्ष्य पुरोडाशवत्। अभिषवः कंडनं। या

शाटीवै२१ वनेवस्लेरागालनोउदकस्येतिदुग्धांतरानिरपेक्षापाजलधारामाएवश्रीप्रंप्रत्ययेनप्रकृतिद्रव्यानपेक्षणादितिभावः।द्र
२७ व्येतिाकाररणांक्रियाचयस्येवप्युत्पत्तत्वादितिभावः।नामधेयमितिाएवंवपजेतेतिसमुदायानुवादस्याप्येतदेवप्रयोज
नमितिभावः।नचड्योतिष्टोमनामकानांकथंनामांतरमितिवाच्यंविनिगमनाविरहेणामपनामकत्वेवाधकाभावात्-सिद्धां
२७ तेपिसएषयज्ञःपंचविधोग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुः४।सोमइतिवाक्यांतरेनामधेयत्वस्येष्टत्वात्-लिंगदर्श
नमणाहतथावेतिाननुक्रमादितिलिंगदर्शनवलादेकस्यैवसोमयागस्याएत्तिकल्पवान्नदोषइत्यतआहयदिचेति-तन्वभि
षवादिविधिवशान्नलतायागसाधनंकिंतुसोमरसएवेत्याशंक्याहआमिषवेति।उत्पत्तिशिष्टद्रव्यस्यवाक्यांतरेणावाधायोगादि
तिभावः।इमामेवयुक्तिंपशुवाक्येप्यतिदिशन्पूर्वपक्षमाह-एवमिति-द्रव्यमेवेत्येवकारेणहृदयादिव्यवच्छेदः।हृदया
देःपशुजातीयत्वाभावातात्रानर्थकानीति-नचलक्षणापाहृदयादिशब्देनपशुमङ्घावदानविधिसंभवात्तानर्थक्यमि
तिवाच्यंएकेनैवतदुपपत्तावथजिह्वापाइत्यादीनांवैयर्थ्यादित्याशयातअतएवानर्थकानीतिवहुवचनमितिापशुशब्दो
पिहृदयादीनांछागप्रकृतिकत्वान्नेषाप्रनुवादइत्यन्वयः।कथंतत्राह-तिकृताचितिाकार्यकारणावदुपचाराद्वित्यर्थः। रांम०
मात्रमित्यतेनयागव्यवच्छेदः।नदाक्षिप्ताअवदानाक्षिप्तं-स्पर्शनेविनात्रावदानासंभवात्प्रतीतिहृदयादिप्रत्येकद्रव्योद्देश २७

नेत्यर्थः। तत्रैव। पशुवाक्य एव। तावंतः। हृदयादिद्रव्यसमसंख्याः। न चैकेन पशुपदेनोपात्तानां द्रव्याणां साहित्यावग
मात्कथमुदितानां देवतासंबंधादेकरूपयागः स्यादिति शंक्यं उद्देश्यविशेषणत्वात् तथा साहित्यस्याविवक्षितत्वात्। पशोन रमा
हृअस्यस्विविति। सान्नाय्यं दर्शगतं दधिपयसी। तद्वच्च दाने मध्यात्पूर्वार्धाच्चहविषोवद्यतीति विहितं प्रकृतिरंगं प्राप्तमिनि
रूपकं पस्येत्यर्थः। प्रकृतिवद्विकृतिरितिन्यायात् यथा सान्नाय्यावदाने पारीय द्रव्यसंस्कारत्वं एवमपीत्यर्थः। आमिषवेति॥
यदि सोमेन विंदेत पत्नीकानभिप्सुराड्यादिति वाक्येन सोमाभावे तत्सदृशलतादिविशेषरूपपूतीकानामभिववविधौ पूती
कानां यथा यागसाधनत्वं लम्यते न तद्वदित्यर्थः। आमिषवस्यापि यागसाधनसोमसंस्कारकत्वात्। तथा वैवमनुमानप्रयो
गः हृदयादिकं यागसाधनं। अवदानसंस्कार्यत्वात्। सान्नाय्यवदिति। समुदायेति। आलभति। पशुशब्दश्रुतिशेषः। द्रव्या
तरेणेति। हृदयादिवाक्यगतहृदयादिद्रव्यातद्रव्यांतरेण पशुसोमरूपेणेत्यर्थः। एतौ। पशुसोमवाक्यस्थावालभतिय
जाती। अन्यो। हृदयादिवाक्यस्थाविधयः। गुणविधायिनः। अवदानग्रहणाद्यंगविधायिनः। लोकप्रसिद्धयमपशुवाक्ये सि
द्धांतमाह। पशुश्चादो हीति। ओनः शास्त्रिगम्यो यः पशुस्तद्विशिष्टेत्यर्थः। सोमपादे ज्वीलाद्वारा पाकसाधनत्वं। यागस्यापर्व
हारात्सोमवाक्ये सिद्धांतमाहानमेति। सोमेन यजेतेति न तावद्धविर्विधानमित्यत्र तेनात्वयः। तत्र हेतुमाह। सोमेत्यादि। अ

सौतन्ता॰ हविर्द्धेन॰ साक्षात्संदेयत्वेनाक्षास्येति॰ इंद्रवायव्देवतेत्यस्येति सर्वनाम्नार्थे तद्धितविधानादिति भावः धारामात्रेति॰ द्रव्या
न्तरनिरपेक्षायाः जलधारायाः एवाक्तेः संकोचो न युक्त इति परिहरति॰ सत्यपीति॰ प्रबलप्रमाणापेक्षितस्तु संकोचः संनिधादिनापु
ष्यते न वात्रापेक्षास्तीत्याह॰ संस्कारेति॰ व्रीहीन् प्रोक्षतीत्यादिष्वित्यर्थः। धारामात्रेति। धारासामान्येत्यर्थः। तथा चोद्देश्यवाचिप
दस्य प्रकृतापेक्षत्वं तद्विधेयवाचिन इत्यर्थः। अनेनैव न्यायेनाभिषवादिवाक्यगतसोमपदमपि नक्तयादिवाक्यगतसोमप
रमित्याह किं चेति॰ आग्नेय इत्यत्र ऐंद्रवायवादिवाक्यस्य यागविधायकत्वपक्षेन तु सोमपदमभिषुणोतीति विनीपपा सोमस्य संस्का
र्यत्वावगमाद्व्रीहीनित्यादिवत्स्वकृतग्रहणमेव युक्तमित्याशंक्याह॰ सर्वेषामिति। सोमस्यापूर्वसाधनत्वाभावेन तत्संस्कारायोगा
त्स तु वद्धिनियोगभंगेन सोमेन क्रयं कुर्यादित्यदृष्टार्थक्रयविधायकत्वान्न परस्परापेक्षेत्यर्थः। प्रकरणशब्देनात्र प्रधानापू
र्वप्रकरणं वा संनिधिमात्रं वा॰ तत्र नाद्य इत्याह॰ प्रकरणस्येति॰ प्रकरणस्य इति कर्तव्यताकांक्षारूपस्य॰ अविशेषकत्वात्॰ सोम
विशेषकत्वाभावात्॰ नापि द्वितीय इत्याह नापीति॰ संस्कार्यालाहिपस्य कस्यचित्तद्योगात् प्रकृतापूर्वसाधनत्वेन सोमो विशेष्य
त न तु तदस्तीत्याशयः। नवमे हि द्रव्यसंख्याहेतुसमुदायमित्यधिकरणे प्रोक्षणादेर्व्रीहिस्वरूपमात्रसंबंधे प्राप्ते विद्व्रीहीन् तदानर्थ
क्यमिति सुक्ते संनिधानाद्यागीयव्रीहीणामेव ग्रहणं भविष्यतीत्याशंक्य तन्निरासार्थं तुल्येषु परस्परानपेक्षेषु ताधिकारो विशेषकः स्यादि

तिवक्ष्यतीत्यर्थः। अप्रवृत्तगामित्वे प्रकृतमात्रविषयत्वाभावः। एकदेशिनः प्राभाकराः। संस्काराः संस्कारवाक्यानि। अचोद
काः। यागाविधायकानि। संभवन्ति चेति। ऐन्द्रवायवसंबंधसंतमं गृह्णातीत्यसंभवेप्येवं संभवतीत्यर्थः। कथं केवलग्रहणेन देवतासंबं
धोपपत्तिरित्याशंक्य यागद्वारेणेति। समाधत्ते यययोरित्यादिना। यागदेवतयोः परस्परसाकांक्षत्वात् उक्तप्रत्ययस्यैव यागस्य ग्रहण
द्वारतापान्वय इत्यर्थः। पश्च यागे केवलेन दर्शनां देवतानां ग्रहणानां चादृष्टार्थत्वेन विकल्पावर्त्ते तस्तज्जसमुच्चयापादिदर्शनानुप
पत्तिरित्युक्तं तत्परिहारायेति दर्शीति। इदमुपलक्षणं ग्रहेज्जुहोतीत्युपादेयपात्रवहुत्वस्याप्यसति समुच्चये तदुपपत्तिर्दृष्टव्या।
नत्वेवमपि सर्वग्रहणात्रं पुनरेकीकृत्यप्रसंक्त देवहोमापत्तेस्तत्तीयमिति क्रमानुपपत्तिरित्याशंक्याह यद्येति। अन्यथा
भेदेन ग्रहणानामदृष्टार्थत्वस्यादिति भावः। तदुक्तं वार्त्तिकेनद्विद्रव्यमवश्यं यथागृहीतं दातव्यं पुनरेकीकरणे पर्वं कृतं ग्रह
णाभेदवैयर्थ्यप्रसंगादिति। प्रयोजनं पशौ पूर्वपक्षे विधक्तिभिन्नत्वेसवनीयपश्वादौ रौद्रयादियागानामेकस्यैव कस्यचिदिति देशा
त्रं दंगमात्रानुष्ठानेन त्वेकादशावदानगणप्राप्तिः सिद्धान्ते तु सर्वेषां यागे। एवं सोमेऽपि पूर्वपक्षे यागभेदादेकस्य कस्यचिद्दंगाति
विकृतौ कार्याणि सकृद्देवचयाग इति। सिद्धान्ते तु यथाप्रकृति माणाभ्यास इति द्रव्यमस्त्रार्थस्य। यत्तु सोमयोः कर्मणो हृदया
दि उव्यसंयोगाच्चोदनाविधिः अन्यथा प्रकरणाम्नातो द्रव्यस्य हृदयादेरवदानसंयोगेन यौक्तः स्यात् न हि संस्कारस्तत्रस्य याग

शाटीवैश॰१ २९

स्य प्रश्रुतत्वादिगुणार्थत्वेन संभवतीत्यत इति ॥ इत्यत्रैकनिवेशात्संख्यायाः कर्मभेदः स्यात् ॥ अभ्यासप्रसंगइति । अभ्यास
प्रसंगागमस्तद्यपवादापवादविचार इत्यर्थः । तत्समासो वाभ्यासस्य वुद्धिस्थत्वात्तस्य च पुनः श्रुतिरूपस्य संख्योदाहरण
ऽभावात्र कर्मभेदः स्यादिति प्रत्युदाहरणरूपा प्रकृतसंगतिः । पूर्वाधिकरणे पागाभ्यासेपि प्रयोगैकत्ववदिहापि संख्याव
त्त्वेनाप्येतावपि कर्मैकत्वमेवेत्याति दर्शिका । अनंतरसंगतिः । अदातीमित्यनेन सूच्यते । विचारविषयतावच्छेदकमाह । अ
त्रेति । एकादशप्रयाजान्यजतीत्यादिवाक्यानां विशेषतां त्रिर्वेदिं प्रोक्षतीत्येतद्व्यावृत्त्यर्थं द्वितीयांकिं पाभ्याए त्रिगुणा
नार्थमुच्यते त्यये नाए त्रिगत संख्याभिधानेन कर्मसामानाधिकरण्याभावान्नेतिसूत्र इति । संग्रहाय पाणिष्टिप्रकरणोऽइंचप
नेवाजश्रमइत्यादिसुवश्वइत्यंतै द्वादशमंत्रेरकारद्वन्ति द्वादशाएवमेकादशापराश्राद्धतयइति द्वादश द्वादशानीत्य
र्थः । दृष्टांतवैषम्येण सिद्धांतमाहस्यादेवमिति । अस्मादुदाहृतवाक्यात्तेन कर्मैक्यात्तत्रीतितिः तिरोनपंचवसंख्याधिस्य
र्थः । धाजापत्यानितीति । इतिकरणेनैपशुनालभ्यतइति शेषो गम्यते । नन्वत्रापि प्राजापत्यानितिवद्भवचनेनद्व्यरेच
मासंबंधवद्भुलावगनेस्त्रल्पपूर्वपक्षमंदत्वमित्याशंक्याहनातीवितिवहुष्वापिद्वयेषुव्यासज्यैकदेवतासंबंधोपपत्तेरिति
भावः । देवताभिधीयतइति । तद्धितार्थप्रतदेवतान्वित्वाभिधीयत इत्यर्थः । यमुद्दव्यमिति । सास्य देवतेति सर्वतामार्थेतद्धितवि

रामं॰ २९

घातात्पशुपदेनच तस्यैव बुद्धिस्थत्वादिति भावः। पशुश्चेति। पशुपदैकशेषप्रदर्शनात् तस्यैव तद्धितार्थ
मत्वइव्यमात्रैकशेषप्रदर्शनार्था। एवं देवतात्वपातेर् वमिव द्रव्ये बहुत्वेनावगते देवतासंबंधो मिलितेषु प्रतीयमाने एक
एवेति यागैकत्वमित्यर्थः। सिद्धान्ते पयत्निमाह किंवेति प्रजापतिना· प्रजापत्या मित्रे देवतायां· एवं बहूनां मिलितानां न
देवतासंबंध· किंतु प्रत्येकमेवेति यागभेदः। भिन्नैरिति· पशुत्वस्य प्रत्येकपर्याप्ततया देवतासंबंधस्य फलत्वैकपर्यवसानादि
ति भावः। देवतेति· देवतासंबंधरूपसर्जनविशेषणतापस्येत्यर्थः। ननु तद्धितनशात्तयो वदेवतासंबंधिद्रव्यं प्रथमप्रत्युच्यते पश्चा
त्तु प्रकृत्यर्थे तस्मिन्नेव द्वत्वान्वयः इत्यैवं देविन इत्यादौ च बहुत्वादेर् विशेषणत्वप्रदर्शनात्कथं केवलद्रव्यएवात्र बहुत्वान्व
य इति शंकते नन्विति। व्यभिवाएग्नीक्रतिपमइत्याहनेति· नचतथा· प्रमीतिरिति शेषः। चोदकप्राप्तं। अतिदेशप्राप्तं। प्रकृताव
ग्नीषोमीयपशावेकत्वस्मरणादेकपशुप्रकृतिक इत्यादेकादशायदीयमानैष्यकत्वं यागांगं प्रकृतिवद्विकृतिरित्यतिदि
ष्टं तदेकस्य यागस्य संप्रदर्शयपशुद्रव्यकत्वे कथं स्यादित्यर्थः। अतिदेशादुपदेशस्य न लवलात् तद्बाधेन क्षतिरित्याह। ननु त्राद
हीति। सांख्यान्वयस्यवाविदित्यादौ प्रकृत्यर्थतावच्छेदकोपलक्षिते दविन इत्यादौ तद्विशिष्टेवोभयथान्वयदर्शनादत्र संदेहे सत्य
तिदेशात्स्वरूपतात्पर्यग्राहकवशेन विशिष्टे एव प्रकृत्यर्थे सांख्यान्वयनिर्णयाद्यागभेदः इति सिद्धान्तमाह मदीत्यादि· एकगणप्रा

शा॰टी॰वै॰२॰१ त्रेः एकपशुनिष्ठमैकादशावदानगणस्य तद्विकृतावतिदेशः प्राजापत्याश्च नतद्विकृत्यपः किंत्वेकादशपशुयागगणा
३० विकृतयः गणात्वरूपावांतरसादृश्यादत आह सवनीयेति सवनेषु त्याकालेभवः सवनीयआग्नेयः पशुयागः तत्र हि दर्भमयर
ज्जुरूपरशना द्वपमगं तदेकादशिनेष्वपि दृष्टमित्यवांतरसाम्यात्तेनतद्विकृतयइत्यर्थः। तथा च सवनीयादिपरं परया परमप्रकृ
30 तिभूतादग्नीषोमीयादेकपशुनिष्ठमेकादशावदानप्राप्तिरितिभावः। ननु प्राजापत्यानां तत्प्रत्यक्षविहितबहुत्वेनैकत्वस्यानु
मानिकस्य बाधो युक्तः एवं त्याग्नेयस्य नियम करोतीति न चेत्। अविरोधे दुर्बलस्यापि बाधोनुचित इत्यर्थः। उभयथा पागैकत्वेन तद्दे
वाकेवलेविशिष्टेवद्रव्येबहुत्वात्वयदर्शनात् तेनसंदिग्धे युवाक्यशेषादितिन्यायेनात्र यागभेदनिर्णय इत्याह तेनेति। तदुक्तं
प्राजापत्येषु यागानामेकानेकत्वसंशये कृतः प्रकृतिवच्चोद्वाक्यशेषेण निर्णय इति। सकलोदाहरणव्यापकतयोक्तातिदेश
एवकर्मभेदसाधको मुख्यः ननु विशिष्टैकद्रुत्वा न पशुत्पत्तिन्याय इत्याह एवमिति। अत्र हि मित्रपदोपात्तदेवतान्वयात्स्वर्वम
वपदश्रुत्या बहुत्वान्वयोऽनु देवतासंबंधविशिष्टद्रव्यद्वतिभावः। प्राभाकरास्तु अनेकयागकल्पनायां गौरवाल्लाघवसहकृ
तेन द्वावित्यादिकल्केवलद्रव्यएव संख्यान्वयस्यायेन पर्वपक्षस्य निर्णये प्रदेहाभावे नानुमानिकातिदेशवशेन सिद्धांतं निरा रा॰म॰
कृत्यासविबाधकविशिष्टएवदोष्वान्वयपशुत्पत्तिबलेनैव सिद्धांतमाहुः स्तन्निराणायाह येत्विति तेषां मत इति शेषः। कर्मभेदाभावे ३०

किं विशिष्टमेव संख्यान्वयमुत्पत्तिबलेनैव सिद्धांतमाशङ्क्य तन्निरासायाह ये त्विति तेषां मत इति शेषः कर्मभेदाभावे किमनिष्टं
तत्राह तत्रेति । प्रयोजनं फलं पक्षे रेवतीसंबंधिनि पशुसमुदाये प्रोक्षणादिसंस्कारः सकृत्कोपान प्रति पश्वावर्तनीयाः
सिद्धांतेतु प्रतिपश्वावर्तनीयाऽइति । सूत्रं स्पष्टार्थम् ॥ संज्ञा चोत्पत्तिसंयोगात् ॥ संगतिं दर्शयितुमाह उद्देशेति । शब्दान्तरमभ्या
सः संख्यागुणः प्रक्रियानामधेयमिति क्रमेण भाष्यकारेणोद्देशः कृतस्तस्यानंतरत्वान्निर्मलत्वादित्यर्थः । अथ वलिर्मलत्व
पाऽप्रयोजकत्वादित्यर्थः । एवमपि कर्मभेदत्वसाध्या संख्यानंतरं गुणविचारो वित्यात्तदुपेक्ष्या बीजमाह वद्धेति । गुणश्च प्र
करणांतरं तिष्ठतु । तथा वस्त्रचीकटाहन्यायेन संज्ञानिरूपणमित्यर्थः । एषमत्रूनिवेशित्वरूपहेतुसाध्यमपि संज्ञायां बोध्यं । ननु
ज्योतिरादिपदानां यागसामानाधिकरण्याभावात्कथं तत्राभत्वमत आह तत्रैतदिति । एतेनेत्यस्य ज्योतिरादिवाचकस्य
यजेतेतिकरणीभूतयागसामानाधिकरण्यादित्यर्थः । अन्तर्ज्योतिर्ज्योतीरूपस्तोमसंबंधित्वात् ज्योतिष्टोम एव भामा
सत्त्वभामेतिवद्धसंतेज्योतिषा यजेतेत्यत्र पश्चानूघतेतथेहोपिज्योतिः पदेनानूघते एवं विश्वानि ज्योतींषि स्तोमरूपा
णापत्रेलिसएवानूपत इतिभावः । एकस्यैवानेकसंज्ञकत्वेनानुवादश्च सहस्रदक्षिणाऽध्यादिरूपगुणफलव्यवस्थार्थः ।
ज्योतिरादिसंज्ञोल्लेखेन प्रयोगे गोसहस्रदक्षिणांऽध्यादि च फलं । ज्योतिष्टोमसंज्ञोल्लेखेन प्रयोगे तु द्वादशशतं दक्षिणा ।

शारीवै०२१
३१
31

स्वर्गश्च फलमिति॥ आर्यभेद इति। कृतेरिसिन्नादेश्च जइत्यौणादिके इसिन्प्रत्यये आदेर्ईस्य च जकारादेशे व्युत्पन्ने नज्यो
तिःशब्देन योगनाश्चपतपापागां नरं प्रतीपत इत्यर्थः। वसंते ज्योतिषेति वसुज्योतिष्टोम एवकृत्तो नामधेयतेत त्राह बलव
दिति। प्रकृतप्रत्यभिज्ञारूपबाधकबलेन तत्र लक्षणाया प्रयोगः स्वीकृत इति भावः। नन्वत्रापि प्रकरणादेतेनेति सर्वनामवशा
च प्रकृतप्रत्यभिज्ञानमस्तीत्याशंक्याह संज्ञाश्चेत्येति। प्रकरणविच्छेदे जाते संज्ञाश्चन्द्रपर्यन्तरगमनाद्यर्थेनरकलुषिता पाति
त्यन्वयः। प्रकरणविच्छेदश्चाधिकारार्थकामशब्दबलेनेति ज्ञेयं। तथा च वसंते ज्योतिषेत्यत्र न प्रकरणविच्छेद इह तु कामशब्दब
लेन स इति भावः। एतच्छब्दस्य प्रकृतपरामर्शकत्वेनोपपन्न इति वक्ष्यति। भेदबोधकत्वेनैवाधेयमित्यादेः सार्थक्यमित्याह एवं चेति। प्र
योजने पूर्वपक्षे प्रकृतिभूतसोमयागस्यापि प्रयोगे पिण्डादशब्दान सहस्रदक्षिणाद्यो विकल्पेनानुष्ठानं सिद्ध्यतेत्युक्तेति। उत्पत्ति
वाक्ये संयोगात्संबन्धात्संज्ञापि भेदिकेति सूत्रार्थः। दाक्षायणयज्ञ इति दर्शपूर्णमासयोरेवावृत्तिविशिष्टयोः संज्ञा न भेदिकेति
बोधयितुं पंचम्यंतस्यानुत्पत्तिवाक्यगताधिकगुणफलविधिगतेति॥ ॥गुणाश्चापूर्वसंयोगे वाक्ययोः समत्वात्॥
पूर्वकर्मानिवेशित्वसाम्यात्संज्ञानंतरं गुणप्रमाणनिरूपणमिति संगतिं दर्शयति इदानीमिति। गुणलक्षणो प्रमाणकः। द्वेध रामः०
ति पूर्वकर्मानिवेशनानिमित्तद्वैविध्यादिति भावः। तदेवाह कश्चिदित्यादि। वृत्त्यप्रमाणेनवातिनादिरित्यर्थः। प्रबलेति उत्पत्तिश्चि ३१

षेत्यर्थः स्वात्मसंगतये। स्वरूपान्वयापायः विध्ययोगादिति। वाक्यभेदवशादित्यर्थः। तथा च पूर्वकर्मानिवेशे उत्पत्तिशि
ष्टगुणविरोधो वाक्यभेदप्रसंगश्चेति द्वयं निमित्तमित्युक्तं ॥ प्रतिपादितमिति ॥ चोदनावद्गुणानां युगपच्छास्त्रात्। चोदि
तेहि तद्वचात्तस्य तस्योपादिश्यतेतितद्बाधकारणगतसूत्रेणेत्यर्थः ॥ तत्र हि विद्धाम विहितयागाऽपेक्षितद्रव्यदेवताविधा
यित्वमाग्नेयवाक्यस्यांशस्य वाक्यभेदप्रसंगेन निराकृतं चोदितविहितकर्मतत्सामर्थ्यगुणवाक्यगतविधेस्तदर्थत्वात् गुणमा
त्रपरत्वात्तस्य तस्य गुणस्यैतत्याकर्मार्थत्वमुपदिश्यतेतिवाक्यभेद इत्यर्थकेनसूत्रावयवेन। तत्प्रसंगादाग्नेयवाक्यैकर्मी
नचोदनागुणानां युगपत्समुच्चयास्त्राद्विशिष्टविधानाद्वैतादिति प्रतिपादितं तत्रैव परासिद्धध्यानपत्नीतिविधानात्तद्घनीभ
तो भागश्चामिक्षा व्यक्त इवीभतस्तु भागो वाजिनो वलावलमिति देवतात्ववाधितं इति शेषः। पूर्वपक्षमाह वाजेनेति। वाजमन्न
मामिक्षारूपं ये यामस्तीति प्रत्ययस्य सर्वनामार्थविधानात्संनिहिता विश्वेदेवा एव वाजिशब्देनोच्यन्त इत्यर्थः। वाजिशब्द
स्य देवतान्तरे रूढिर्न्नंकामपाकरोति यौगिक इति। रूढिकल्पनायां प्रमाणाभावादिति भावः। नन्वेतावतापि देवतात्वाबोधात्मुत्तरं पा
गानुवादकयेत तत्र द्रव्यविधिरत आह तेहीति। मत्वर्थसंबंधस्य देवतात्वेनैवपर्यवसानस्य पूर्ववाक्यालोचनेनावगमात्तस्य च
यागाक्षेपकत्वाद्युक्तोस्तत्र द्रव्यविधिरिति भावः। सिद्धांते दोषवत्तुल्यमाह। एव वेति। योग्यताबलेनामिक्षासाधनके वाजिनपा

शा॰टी॰वै॰२।१
३२

धनकत्वस्य बाधादित्यर्थः॥ संयुक्तं आमिक्षासंयुक्तं। निष्कृष्येति वाजिभ्य इति कारकस्य क्रियां विनान्वयायोगात्तत्संबंधोपलक्षितया
गक्रियामात्रं कल्पितं यजिपदेनानूद्यत इत्यर्थः। नन्वेवमपि वक्ष्यमाणया यागस्यामिक्षायुक्तत्वात्कथमाकांक्षेत्यत आह आमिधाने
ति यथा प्रत्ययाभिहितं क्रियाकारकसाकांक्षमानत्तुसैव क्रिया शब्दाभिहितेत्यर्थः। योग्यताचेति। एकस्मिन्नेव यागे व्रीहियव
वदित्यर्थः। कथं तर्हि यजति ददातीत्यादौ समुच्चयभावना नानुवादेन तत्तद्गुणविधानं निरस्तमत आह शब्दान्तरेति। प्रत्ययः परश्चे
त्यनुशासनेन प्रकृत्युत्तरत्वेनैव प्रयोगात्प्रकृत्यर्थान्वितत्वं भावनायास्तेनोपस्थाप्यते तत्तद्गुणेत्यर्थः। प्रकृते तद्दूषयन्नाह इहात्वि
ति॥ श्रौतत्वादिति। तद्धितस्य सन्निहितद्रव्यवाचित्वादिति भावः। केवलेनेति। तथा सत्यामिक्षापदवैयर्थ्यापत्तिरिति भावः। समु
च्चयो वेति। वाजिभ्य इत्यत्र वाजपदार्थामिक्षायादेवताविशेषणत्वेऽपि एकविशिष्टस्यरवैशिष्ट्यमिति रीत्या समुच्चय इत्यर्थः। तुल्य
बलत्वाभावान्न विकल्पसमुच्चयो युक्तावित्याह आमिक्षाया इति। श्रुतेः। वैश्वदेवीति पदश्रुतिवशात्। उत्सन्नेकर्मणीति शे
षः। वाक्याच्चोद्यत इति शेषः। तत्र वाजिनं। आविरोधाशंकां निरस्यति पक्षेति। अनुवादस्य पुरोवादसापेक्षत्वात्पूर्ववाक्यालो
चने विशिष्टस्यैवोपस्थितेरेकार्थ्यं तयास्येव विरोधस्फुरणमित्यर्थः। श्रुतेरिति श्लोकगतं पदं व्याचष्टे श्रौतत्वेति। पदान्तरे रांम॰
ति। अस्येति सर्वनामार्थे विधानादिति भावः। आमिक्षापदस्यात्र पदस्थितिमात्रे उपयोग इति नानर्थक्यमिति भावः। अस्य इति त ३२

द्धितस्य द्रव्यस्य सामान्यवाचित्वं निर्विवादं चतुर्थ्यास्तु न तदपीति न विप्रकर्षः। वाजिभ्य इत्यत्र ददातिपदाध्याहाराद्विप्रकर्षः। अन्यथाकार
कविभक्तेरनन्वयात्। एवं तद्धितस्य देवतावाचित्वं चतुर्थ्यास्तु तच्छेषकत्वमिति विप्रकर्षः। त्यज्यमानद्रव्योद्देश्यत्वे सति प्रतिग्रहीतृत्व
रूपसंप्रदानत्वे हि शक्तिः संप्रदानमात्रे तु लक्षणेत्यपि वा विप्रकर्षः। गुणश्च वाजिनादिरपूर्वयोगपूर्वकं कर्मसंबंधासंभवे मद्दक इति शेषः। कु
तः वाक्ययोः कर्मविधायकत्वेन समत्वादिति सूत्रार्थः। प्रयोजनं तु स्पष्टम्॥ अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेतेति सूत्रे दध्नानु
होतीत्यादावेव द्वेषस्य प्रदर्शनार्थं कर्मविधायके शब्दे अग्निहोत्रं जुहोतीत्यादौ गुणरहिते। सति तत्र दध्नादेर्गुणस्य वाक्यान्तरादपि
प्रतीयेतेत्यर्थः। अपवादसंगत्यातिचारांतरपरत्वेन व्याख्यानमारू अथ वेति। समुच्चयमाशंक्याह अन्यतरेति। एवं च संनिकर्षवि
प्रकर्षयोरभावं दर्शयति पयोवीर्यपर्यंतं॥ फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात्॥ तत्रैवेति। अग्निहोत्र एवेत्यर्थः। आश्रितमि
ति विशेषः। कर्मणा इति पंचम्यभिधानार्थस्य फलभावनाकरणत्वमुत गुणस्येति संशयार्थः। एतत्संशयस्य पूर्वसंशयापार्थंतां दर्शयति। यदीति
नु दध्नो होमरूपक्रियासंबंधं विनोदासीनस्य फलसाधनत्वायोगाद्धोमसंबंधस्यापि विधिरिति कथं न वाक्यभेदोऽत आह दध्नो होमे
ति। फलार्थगुणेनापेक्ष्यमाणः संबंधी आश्रयस्तत्संबंधो गुणाश्रयापी। प्रकरणासंनिधिः न यावद् दध्नो होमसंबंधः संनिधिस्त एव
वाक्येन तु तदनुवादपूर्वकं फलसंबंधमात्रं विधीयत इति न वाक्यभेद इत्यर्थः॥ ननु फलानुकूलव्यापाररूपभावनायाः पूर्वपक्ष

शाद्दीवै २१
३३
33

इव सिद्धांतेपि फलभेदेन भेदनिश्चयाद्विवाक्यत दर्थत्वाभावेक यमध्यामसंगानिरतत्राह· सत्यपीति। धात्वर्थभावनापूर्वीराणां त्र
घाणां भेदस्याध्यापार्थत्वान्न दोषइतिभावः। अनंतरसंगतिस्त्वगुणोत्लितिमत्र तस्य प्रत्युदाहरणेन पक्षेकर्मान्तरत्वापवादाद्दधिक
रणांतरपक्षे गुणस्य पूर्वकर्मांगत्वापवादापवादिकीतित्रेपं· तदर्थइति· धात्वर्थार्थइत्यर्थः। ननु धात्वर्थस्य विधेयत्वेभावार्थाधि
करणन्यायेन त्वत्र तद्विधिः प्राप्नत्वात्किंतु गुणएव फलेविधेयइत्यत आह· किंचेति। तु होते हीमस्य दध्यान्वयेन स्यादित्यर्थः
सोपिंदाधि होमसंबंधोपि· ननु प्रत्ययोच्चारणार्थमेव जुहोति प्रयोगोस्त्वित्याशंक्याह· तस्यचेति। उदासीनस्य दध्नः क्रियासंबंधे
विना फलेविधानायोगादेव स्यं क्रियाकारकसंबंधोऽभ्युपेयइतिभावः। प्रथमश्लोकोक्तं पूर्वपक्षोपपत्तिं दूषयति धात्वर्थस्येति।
सिद्धांतकल्पनालाघवमाहनात्रेत्यादि द्वितीयश्लोकोक्तं पूर्वपक्षोपपत्तिं शंकते· जुहोतेरिति। इदानीं गुणमात्रविधेः गुरुत्वं
चोक्तं समाधानं दूषयितुमुपन्यस्यन्निकोविदितिं· कर्मापन्नो होमविशेषणतामापन्नं· अभावार्थस्येति। अधात्वर्थस्यआक्रियात्म
कस्येतिपाठेत्र विधीतिकार्थत्वरूपविधोक्तं त्वयञावि यफलापाप्यत्वादित्यर्थः। दध्यनुरक्तो। दधिसंबद्धः। वाक्यभेदइति· प्राप्ते होमेद
धिसंबंधः फलसंबंधश्चेत्यनेकविधानादितिभावः। परिहरति· दध्नइति। कथं नहि होमदधिसंबंधसिद्धिरतआह नौकिकमिति। शब्दव्यु शम०
त्पत्तियागपतारूपलौकप्रमाणसिद्धमित्यर्थः। क्रियापत्तिः क्रियाविशेषणता· तादर्थ्यमंगत्वात् द्विविधिगम्यमितिभवेद्वाक्यभेदो ३३

ननुतदंगीक्रियतइत्यर्थः।कुतस्तत्राह-कर्मणाइति-वाक्यभेदप्रसंगेनकर्मणोहोमस्यफलंप्रतिकरणत्वाभावप्रसंगादित्यर्थः।
नन्वेवंसतिहोमेदध्यादिविधानात्पयोहोमादर्थाद्रिपफलापाप्तिरतआह-अतइति-फलार्थतापयोहोमाद्दिव्यावृत्तस्वजन्यविजाती
यहोमस्यफलसाधनस्यसंपादनद्वाराफलप्रयोजकता-प्रतीयतइतिदध्नेतिपदसमभिव्याहारादितिभावः।होमार्थत्वंहोमा
गतो।फलितमाह-तेनेति-होमाश्रितस्यहोमसंबन्धिनोदधिव्यापारस्येदध्नीहोमानुष्ठानस्येत्यर्थः।तथानुष्ठानंवाविजातीयहोम
रूपसाधनस्यसंपादनद्वाराफलप्रयोजकताप्रौदध्नोनियमेनोपादानंविनानशिध्यतीतिदधिनियमलाभइतिभावः।तदिदं
हृद्यपतिएवंतहीति-तथावकर्मफलसंबंधएवस्यान्नगुणफलसंबंधइत्यर्थः।वाक्यभेदोपितदवस्थइत्याह-अपिवेति-तदनु
रागेस्तत्करणकत्वंगुणफलसंबंधसिध्यर्थप्रकारांतरइत्याशंकतेनत्वितिदध्नोविधानाभावादित्यस्यहोमार्थनयेतिशेषपूरणेना
र्थइतिभावः।होमेकारकीभूतमिति।होमनिरूपितकरणत्वविशिष्टमित्यर्थः।अत्रापिदधिहोमकरणस्यासंबंधोदध्नश्चफ
लसंबंधइतिवाक्यभेदइत्याहलुब्धतइति।ननुयोगपतपाक्रियाकारकसंबंधस्यज्ञातत्वान्नतदंशेविधिःकिंत्वज्ञातफलसं
बंधांशएवेतिशंकतेनन्विति·अज्ञातत्तोपनंकर्तव्यताबोधनंचद्वयंविधिकार्यप्रसूतेप्रथमस्याभावेपिद्वितीयविध्यधीनमे
वेतितत्रापिविधिव्यापाराद्वयरूपकत्वादुरूद्वाएववाक्यभेददोषइत्याह-नैतदिति-वाक्यभेदमेववचनव्यक्तिप्रदर्शनेनविवृणो

शा०दी०वै०रा०१ ३५ ति॰ तथा हीति लौकिकक्रियाकारकसंबंधाभ्युपगमेन वचनव्यक्तिं प्रदर्श्य दोषमाह॰ अपेति। संभवे चोपपन्नता या। प्राप्तमिति। एग
गस्तावत्र प्राप्तिर्दृष्टफलकत्वाभावात् दध्नाजुहोतीति विधिना सक्तप्राप्तत्वेपि विशिष्टानुवादाद्वाक्यभेदः स्यात् हेमेनेंद्रियंभावये
द्धोमं च दध्नेति॰ नहि नियमेन दधि होमप्राप्तिपस्यानुवादः संभवेदिति भावः। वचनव्यक्त्यंतरमाशंकते अपेति॰ अर्थेनेति भावप्रधा
नेकामपदं नकाम्यमानफलपरं किंतु तत्कामनोपलक्षितपुरुषपरमिति शंकते अपेति। फलस्वरूपाभिधायिनः। फलेच्छाभिधायि
नः इच्छाविषयत्वस्य फलत्वात्॰ लक्षणेति॰ स्वार्थस्यात्वयानुप्रवेशाभावादिति भावः। सिद्धांतहानिश्चेत्याह अपिवेति। अत्र निबं
धनकारमते दधिरूपगुणानुरक्तं तमाहोमस्याग्निहोत्रहोमाद्वैलक्षण्यापात्तद्विषयमपूर्वमित्रमेवेति शाब्दबलवादानुसारेण सिद्धांतः
विवरणकारमते तु वस्तुबलानुसाराद्धस्ततः स एव होमो त्रापीति विषये क्यादपूर्वमप्येकमेवेति विवरणेत तस्माद्दध्नाग्निहोत्रापूर्वानुरा
गो लोकमिद्धापि न लभ्यत इति मुत्तरां वाक्यभेद इत्याह॰ विवरणेति॰ गुरुमतदूषणामुपसंहरति तस्मादिति। उक्तरीत्या वाक्यभेदादित्य
र्थः। स्वमतेन जुहोत्यन्वयमुपपादयामुंचेष्ठति॰ कथमिति। शक्तिमत्कारकमिति मतेन कारणीभूतं दधि प्राधान्येनोक्तं दध्ये वकुतो
न विधीयते तत्राह त्वतीयेति दध्नेतीत्वस्यात्रालयः संतिन्धीति। अभयाकांक्षालक्षणस्य दध्नः फलार्थतया होमस्य च इयांतर रामं०
साधनकत्वावगमेनाभावादिति भावः॰ फलसाधनस्य करणत्वं फलभावनान्निरूपितमेव होमयागादिव घुक्तमिति शंकते नन्विति। अ ३५

35

पत्ततस्तुती यो पात्रकरणात्वस्य फलभावनान्वयांगीकारे पितृत्यर्थवसाना योगात्त्रकृतत्क्रियाकरणत्वमवश्यंपकल्प्यं नतत्रत्तुती
योक्तकरणता यानिरूपकमात्रकल्पनमेव लाघवात् युक्तं फलभावनाकरणत्वं तु विधिबलादेव संसर्गत यमाणादिवत्स्तुती यत
इति नत द्विधानमभावेश्पाकमिति समाधत्ते उच्यत इति· स्वरूपेण। स्वरूपमात्रेण· विषयस्य· आश्रयस्य· न स्वरूपेत्ति। पुरुष
व्यापाररूपा हि कृतिर्न दधिमात्रविषया किंतु दधिव्यापारविषयेत्यर्थः। किमर्थं दृष्टार्थव्यापारविषयतापेक्षिते त्याशंक्याह
अवश्यंपचेति· वैयर्थ्यमिति पुरुषं प्रति दधिविषयव्यापारानुष्ठानोपदेशाभावे स्यात् दृष्टार्थयागानुष्ठानापत्र घ्नाविदवस्थि
तादृश्यः फलसिद्धुर्दृश्युपदेशवैयर्थ्यमित्यर्थः। उपसंहरति तस्मादिति· प्रयोजनं पर्वं पक्षेकर्मांतरस्या पयस्याग्निहोत्रतुल्यका
लतपाकर्मद्वयं तत्रैणाकारिष्यइत्युद्धत्र खः। सिद्धांते तु· गुणफलार्थं गुणोनाश्रयं कारिष्य इति·॥ कलश्रवणात्कर्मैव विधेयस्या
त कुतः फलस्य कर्मरूपकरणायोगित्वादिति सूत्रार्थः॥ समेषु कर्मयुक्तं स्यात्॥ त्रिवृदिति। स्तोत्रसापनर्चोनवसंख्यारूप
स्तोमवातित्यर्थः। अग्निः स्तूयतेऽत्रेत्यग्निष्टुन्नामकः अग्निष्टोमसंस्थाः अग्निष्टोमस्तोत्रेण समाप्य इत्यर्थः। एतत्स्य कृति
भजत पूर्वपठितयागे उक्थ्यसंस्थागत बाधेनाग्निष्टोमसंस्थाविधिः। अत्र कर्तव्य इति शेषो बोध्यः। तस्येति· तस्याग्निष्टुद्याग
स्यांगभूतं अग्निष्टोमसाम अग्निष्टोमस्तोत्रं विशेषणप्राधान्यात्· वायव्याम्भूक्षु। एकविंशस्तोमस्तोमकं कृत्वा एतेन यागे

शाटीवै२।१ ३५ नत्र ब्रह्मवर्चसंभावयेदित्यर्थः। वारवंतीयमिति॰ अग्निष्टोमाख्यस्तोत्रेयत्साम कार्यं तद्वारवंतीयाख्यमित्यर्थः। तत्र हि यज्ञायज्ञीया

ख्यं साम प्रकृतितः प्राप्तं वाधित्वेदं विधीयते॰ तस्येति परं परासंबंधे षष्ठीत ञ्चं बाधितस्तोत्रसंबंधिनमित्यर्थः। एतस्यैवेति॰ एतस्यैव याग

स्य संबंधि अग्निष्टोम सामएतन्नामकं स्तोत्रं रेवतीषु अग्निष्टोमे पुवारवंतीयाख्य साम साधनकं कृत्वा एतेन यागेन पशुकामो यजेत

त्यर्थः। फलापेति पूर्वान्वितं। ततश्च एतेनेत्यस्य रेवतीषु वारवंतीयं कृत्वेत्यर्थः। यजेतेति तु प्रत्ययोच्चारणाय यजतिप्रयोगो निर्वे

पतिवत्प्राप्तानुवादइत्यर्थः। आनर्थक्यादिति शतिकरणोत्तरं न्यायेनेति शेषः। त्यतीयेदिसप्तदशारत्निर्वाजपेयस्य यूप इति वाक्यविधी

यमानं सप्तदशारत्निपरिमाणं प्रकृतवाजपेयेसात्वाद संभवात्तदंगपशुयागे यूपे वैनतरतीति यथोक्तं तथेदापि प्रकृतेयागे ऽसंभवदा

श्रयत्वेन तदंगस्तोत्रे वर्ततेत्यर्थः॥ विपरिवृत्तिः। संनिधिः चोद्यत इति॰ श्रुतत्वादेनविधीयत इत्यर्थः। तथा च श्रवणप्राप्तानां गत्यान्यथानुप

पत्त्यायागद्वारोपकारकत्वकल्पनमानर्थक्यमतदंगत्वापत्त्या विषयः आश्रयत्वं तु यागस्य श्रुतत्वादेनावगतेयदंगद्वारा कल्प्यते॰ किंतु क

ल्प्यं तत्तु योग्य एव कल्प्यमिति मुख्यमितिभावः। प्रधाने कारकत्वमित्यनंतकल्प्यमित्यध्याहार्यं एवमिहाश्रयापेक्षामंगीकृत्योक्तं वस्तु

तः सेवा तन्नास्तीत्याह साम्न इति॰ संबंधांतरेणेति॰ काम्यो न्यप्पादिसंस्थायामाधारत्वेन ज्योतिष्टोमस्याश्रयत्वांगीकारवदितिभावः। रा।म०

प्रकृते आश्रयाकांक्षामुपपादयति॰ तेनेति॰ हृष्य यतिएवमिति। ननु वारवंतीयसाम्नो आगाधारत्वादग्निष्टोमस्तोत्रसाधनआगाधा ३५

रत्नयावक्तत्वर्थतापाः। क्लृप्तत्वादग्निष्टोमस्तोत्रसाधनत्वाकसंबंधेनैव फलार्थतापि युक्तेति युक्तोनुवाद इति शंकामपाकरोति। नचेति।
ननु क्लृप्तत्वमेवाग्निष्टोमस्तोत्रसंबंधमानमत आह। किं चेति। त्वकाक्ष्यगतक्रियामपेक्ष्यसमानकर्तृकत्वसंभवे वाक्यांतरीयामपेक्ष्य
न द्वाधानसंभवतीति भावः। कृत्वाज्ञाद्वकल्पितेति। तद्बोधितेत्यर्थः। अग्निष्टोमस्तोत्रेतुनात्र विधीयत इत्याह तत्रेति। सामूः वारवंती
यस्याः प्रकृतितः। अग्निष्टुद्यागात्। ननु वारवंतीयस्याग्निष्टोमस्तोत्रसंबंधेपि रेवतीनां कथं तत्संबंधस्तत्राह तदनुवद्धा इति। तदा
नमृता इत्यर्थः। एतच्छब्दोन प्रकृतपरामर्शकः। किंतु प्रस्तूयमानपर इत्याह एतदिति। पर्वोक्तगुरुमतेत्वेतत्सिद्धांतहानिरपि दूषणा
मिति प्रसंगादाह येत्विति। लौकिके। सामान्यांकंगस्य रागमव्यक्तिद्वाराक्तवांच गुणगुणिसंबंधाभिधाने सामर्थ्यमन्वयव्यतिरेकसिद्धमि
त्यर्थः। विरोधगात्वं। अंगतया। तस्य। स्तोत्रयागसंबंधस्यलाघवादाह। यद्वेति। निर्वापपरस्येति। निर्वपतिधात्वत्ररस्येव विधेर्निबंधपदि
त्यादावित्यर्थः। प्रयोजनेस्य छमः। आग्नेयाग्नापिभावेनानन्वयात्समेषु कर्मयुक्तमेव फलस्यानंगुणयुक्तितिमंत्रार्थः। सोभरे पुरूपश्च
त्रेनिधनेकामसंयोगाः। य इति। अत्र ससौभरेणास्तुवीतेत्यस्य वाक्यात्रयेप्यन्वयः। ऽद्द्रैश्यानेकत्वेनैकवाक्यत्वाभावात्। वृक्षेति। ज्यो
तिष्टोमस्य षोडशिसंस्थावांतरप्रकरणे विहितेब्रह्मसामाख्यस्तोत्रे प्रकृत्येत्यर्थः। वारवंतीयवत्। सोभरस्यापि गीतिक्रियात्मकत्वा
त्कथसाध्नयाकांक्षेत्याशंक्यतामुपपादयति। यद्यपीत्यादिना। तत्साधनमप्रत्नस्येव। स्तोत्रसाधनमप्तत्स्येव। प्रत्ययार्थप्राधान्यमव

शाटीवै२।१
३६
36

लेत्याह-करणकारकमिति-करणेतिभावप्रधानो वा रवेती येनुनापं प्रकार इति वैषम्यमाह-द्वितीयां नेति-निधनमिति-प्रस्तावं प्रति
हारो द्वीयो पद्रवा निधनाख्याः पंचसाममभागास्तत्रोऽन्त्यभागाधारतयाहीयादप्यन्त्यः शाखाभेदेनाम्नानान्नानियमेन प्राप्तावृष्टिफला
र्थसोभरेहीषित्येवनियमं पत इत्यर्थः। एतेनेद्रियकामाधिकरणेवत्त्यधिकरणयोरपवादादनंतरसंगतिः। स्तविता-भावनाभेदसाभेद
फलकवात्वाल्वधाप्यसंगतिर्ज्ञेया। ननु इष्टद्रि साधनसोभरे हीषादिविधौ लक्षणाद्रोषात्फलान्तशर्यात्ते वपुक्तेत्यत आह-किं चेति-
ननुदिति। हीषित्येलाववत्ताशाब्देनसोभरानिष्पत्तेरितिभावः। ननु पागस्तोत्रयोरिवसोभरतदेकदेशयोर्नात्यंतभेद इति कुतो नांगावता
र इत्यत आह सत्यपीति-अनेकावयवलात-प्रस्तावाद्यनेकभागत्वात्। सामद्रतिशेषः। अनर्थकमिति-पाक्षिकानुवादत्वेनित्य
वच्छ्वरणानुपपत्तेरित्यर्थः। विधाने-निधनाख्यांतिमभागस्याश्रयत्वविधाने। वाक्यभेदः। फलसंबंधाश्रयसंबंधयोरेकेनविधाना
योगादितिभावः। एवं वति पमविधिलायवायत्वक्षेणैवपुक्तत्याशपेनाहलस्मादिति। वस्तुतो नलक्षणापात्याह अप चेति-ना
राशंसः नराशंसदेवत्यः कथं तर्हि भाष्ये लक्षणोक्तमत आह-साधनेति-परंपराशब्दार्थस्वीकारसादृश्याहोणपालक्षणाशब्द
इत्यर्थः। ननु कामुविरशाखामुदाहीषित्येतन्निधनकसोभरसमानजातीयं सोभरमेवोगीतिनिधनपुक्तमाम्नातं तत्र शाखाभेदेपिस्व रा.म०
रूपैक्यादृष्टवर्ण्यप्रयोगेऽन्येषामपिविकल्पेन-प्राप्तेर्नियमो युक्तः। यत्तु हीष्टनिधनकसोभराद्विजातीयमेवकामुचित्तशाखामुपदि ३६

तं सौभरे तस्य स्वरूपमेदा ह्वी यादित्यिधनमन्यत्राप्राप्तमेवेति कथं नियमविधिरित्याशंकां परिहरति · यद्येति । शाखान्तरगत इ
ति · विजातीयसौभर इत्यर्थः । एवं चानिधननियमविधिवशादेव तत्र निधनकसौभरविशेषएव फलार्थविधौ यत इत्यापि नियमः फ लि
त इत्याह किंत्विति · उपसंहरति · तस्मादिति · विधीयत इति पूर्वार्धान्वयि · प्रयोक्तवैरूप्ये पक्षे केवलयोपि सौभरप्रयोगे हीषादितो वृ
ष्ट्यादिफलं · सिद्ध्यतेनोक्तं । सूत्रे तु सौभरे निधने सौभरानिष्ठिते हीषादिनिधनेकामसंयोगः फलसंबंधः कुतः पुरुषश्रुतेः वृष्टिकामा
येतिकामपुरुषश्रवणादिति व्याख्येयं · ॥ इति श्रीमत्पदवाक्यप्रमाणमितज्ञस्य द्रामभट्टात्मजवैद्यनाथकृतायां शास्त्र
दीपिकाव्याख्यायां प्रभाख्यायां दशमाध्यायस्य द्वितीयः पादः ॥ ॥गुरुगस्तु॥ ॥ यदीति · ज्योतिष्टोमे हि रथंतरं पृष्ठं भवति बृह
द्वा पृष्ठं भवतीति बृहद्रथंतरयोर्विकल्पोस्ति तेन तत्सामकत्वेनिमित्ते ऐन्द्रवायवाग्रग्रहस्यायता प्राप्त्यरूपा विधीयते एवं
वाक्यांतरेपीति · विधीयत इति । रथंतरमात्रसामकत्वविशिष्टे ऐन्द्रवायवाग्रत्वविशिष्टेत्यर्थः । कृत्स्नेति · सर्वस्तोत्रावच्छि
न्नेत्यर्थः · निमित्ततावच्छेदकतोरेवावगम्यत इत्यन्वयः । व्यवच्छेदः विशेषणांतरव्यावर्तकं · व्यापि । सर्वावच्छेदेन वर्तमानं · यथा
नीलोघट इत्यत्र पीतादिव्यावर्तकं सर्वघटव्यापि च नीलत्वं · किंचिदवच्छेदेन नीलवति नीलोघट इत्यप्रतीतेः एवं चनात्र ज्योति
ष्टोमानुवाद इत्याह · ज्योतिष्टोमे चेति · अन्येषां · सामांतराणां · विशेष्यव्यापितापि नेत्याह · रथंतरेशेति · ननु दंडी कुंडली चैत्र इति

शाटीवै२।१ वचावच्छेदकत्वव्यापित्वयोरभावेप्येकदेशसत्तामात्रेण विशेषणत्वं स्यादत आह· सामानाधिकरण्येति· तथा च नैरपेक्ष्यलक्षणसामर्थ्या

३७ भावात्समासानुपपत्तिरिति भावः।पूर्वत्र अप्रकृतज्योतिष्टोमे· गुणा इति· तथा च गुणप्रयुक्तभेदाभेदावर्तनमिह पादे क्रियते : पूर्वं निष्कि

तविधेयताकगुणश्चिंतितः इह तु संदिग्धविधेयताक इति भेदः। होमादिविधौ वृष्टिसाधनसोमरसनिमित्तत्वं यत्र रथंतरसामक क्रतौ

37 सत्त्वान्नास्तीति प्रत्युदाहरणरूपेण पूर्वपक्षादनंतरसंगतिः।निपातत्वादिति· निपातानां द्योतकत्वात्तदभावे यदाग्ने य इत्यादिवद

विवक्षितार्थत्वेत्यर्थः। अर्थे परित्यागादगमध्याहार इत्याशयेनाह रुचीति· यदि रुचिः स्यादिति योजनेत्यर्थः। आदिनाग हू

यादिति लिङ्· इच्छार्थः कामप्रवेदन इत्यनुशासनात्। तथा च यदिशब्दस्य व्यवहितान्वयः यद्यैंद्रवायवाग्रान्ग्रहान्गृहीतुमिच्छेत्त

दा रथंतरमात्रसामकं पात्रं कुर्यादित्यर्थः। यद्यास्यादिति लिङ् हेतौ हेतुहेतुमतोर्लिङ् इति सूत्रात्· तथा च रथंतरमात्रसामकक्र

तुहेतुकैंद्रवायवाग्रताकर्त्तव्येत्यर्थः तदुक्तं· यदिशब्दपरित्यागोऽध्याहारकल्पना· व्यवधानेन संबंधो हेतुहेतुमतोश्च लिङ्· ति

सिद्धांतमाह· यदीति· यदिशब्दस्य प्राप्तिद्योतकत्वात्सापेक्षप्रकरणेन प्रमितत्वादित्यर्थः। नित्यप्राप्तेति· देवदत्तो मनुष्य इत्यादौ

हि मनुष्यत्वस्य नित्यप्रसिद्धस्य कथनं व्यर्थमिति शङ्करत्वादिव्यवच्छेदज्ञापनेन तद्विशेषणमुच्यत इत्यर्थः। तत्प्रतिपादनेपि· तन्मा रामः

त्रप्रतिपादनेपि· असत्त्वेति· अयोगव्यवच्छेद इत्यर्थः। इतरव्यावर्त्तकत्वमपि संभवत्येवेत्याह यद्यपीति· सापेक्षत्वेन समासानुपपत्ति ३७

मुक्तोपपरिहरति॰ न चेति॰ स्वकार्ये हि सापेक्षत्वादोषः न च रथंतरकार्ये पृष्ठस्तोत्रे सामान्तरसापेक्षतास्तीत्यर्थः ॥ विशेषणपरत्वादिति॰
विशिष्टस्य निमित्तत्वेऽस्मिंस्तु विशेष्य वाध्याद्विशेषणोपपर्यवस्यतीत्यर्थः । दधिकरणाक होमे प्रवृत्तानो विधि हि मस्य प्राप्तत्वात्तत्रासंभवन्नविशे
षणोद धिकरणत्वे पर्यापर्यवस्यति धत्परः शब्दः स शब्दार्थ इतिन्यायादिति दृष्टान्तार्थः । आकांक्ष्यधिकरणगतेनाग्रहीतविशेषणान्या
यमिहापि योजयति प्रथमेति॰ रथंतरमेवेत्यवकारेणाकृतोर पिनिमित्तकोटाव प्रवेशादित्युक्तं॰ प्रकरणादेव क्रतुगतत्वलाभादिति॰ प्र
योजनं पूर्वपक्षेकर्मान्तरं सोमयागगर यं तर मात्र साम कमिति स्तोत्रारणा वर्तनीयानि॰ सर्व स्तोत्रे षु रथंतरस्यैव गेयत्वात्॰ एवं बृ
हत्सामकेऽपि॰ ग्रहाग्रतायामधिकाविशेष इति भिन्न एव तत्प्रयोगः सिद्धान्ते तु नेति॰ गुणस्फारथंतरसामत्वादिः क्रतु संबधात्कर्मान्तरमे
व प्रयोजयेद्विधयत्॰ कुतः संयोगस्य विशेषणसंबधस्य अशेषक्रतोम त्वादवगतत्वात्तस्य च ज्योतिष्टोमेऽसंभवादिति सूत्रार्थः
॥ ॥अवेष्टौ॥ ॥राजकर्तृकइति॰ राजा राजसूयेन स्वाराज्यकामो यजेतेति वचनादित्यर्थः । आदितारिंदुमेकादशकपालम
यमो दक्षिणा वैश्वदेवं चरुं पिशंगी पष्ठौही दक्षिणा॰ मैत्रावरुणीमामिक्षांवशा दक्षिणा॰ वार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणेति वाक्य
चतुष्टयसंग्रहः॰ पिशंगीपिशंगवर्णा पष्ठौही॰ वालगर्भिणी गौः वशा वंध्या गौः ॥ शितिपृष्ठः श्यामपृष्ठो गौः । सर्वत्र निर्वपतीत्यनु
षंगः । पंचानामपीष्टीनां॰ दिशामवेष्टयो भवंतीत्यर्थवादाद वेष्टिनामकत्वादवेष्टिरित्येकवचनप्रयोगः । दक्षिणाभेदाश्चासां दृ

शाटीवै२।१
३८
39

घ गेव सांगाः प्रयोगाः॥ पदीति·नाहं स्वस्त्वं चरुं चतुर्णां हविषां मध्ये निधाय त्राहुतिमाहुतिं चतुर्णां हविषां हुतानां वाहं स्व
त्व चरुमभिघारये दित्यर्थः। पदि राजन्य इत्यनंतरं यजेतेत्यनुषंगः। ऐं इमित्यनंतरं च मध्ये निधायेत्यादिः। एवमुत्तरत्रापि त्रेधे·एजो
पपदेति·रातन्त्र पविधिवाक्यगत राजन्यदवशोनेत्यर्थः। अर्थादिति·राजकर्तृकराज्यस्य पस्याराहाकरणाशक्तेरित्यर्थः। राज्यं·प्र
जापालनं रूपं·राजशब्दः। आर्यावर्त्तेति। शिष्टप्रसिद्धित्वेन प्राबल्यसत्त्वेन·सर्वेति·आर्यावर्त्ततदितरसाधारणेन पालनकर्त्तरि
राजपदस्य प्रसिद्धिरितिव्यापकतयापि सैव प्रबलेत्यर्थः। अविगाना। दिति·द्रविडानामपि प्रजापालनकर्त्तर्यराजशब्दप्रयो
गाभावाद्विप्रतिपत्त्यभावादित्यर्थः। अथवा द्रविडेतरसर्वलोकविप्रतिपत्त्यभावादित्यर्थः·द्रविडेष्विति पर्वी च्चितं·वि
गीतं चेति·क्षत्रियपलनिमित्तत्वं विप्रतिपत्तिग्रस्तमित्यर्थः। तदन्येषु·द्रविडभिन्नसर्वलोकेषु·अप्रसिद्धितः। विरूढयोगप्रसिद्धि
वशात्·तथाच बहुविरोधाय क्षयाल्पस्य छविरोधो न बाधक इति भावः। जत्रपाठादिति। पुरोहितादिगणे पाठादित्यर्थः। आचा
रात्स्य योगरूपात्·स्मृतेः। व्याकरणस्मृतेः स्थितत्वासिद्धातितोस्मृतिचरणाइतिशेषः। साध्विति·संबंधस्य शास्त्रहेतुत्वादित्याप
त्व्याकरणस्मृतेः प्रयोगवाधेनार्थांतरवाचकत्वे तात्पर्यं किंतु साधुशब्दव्युत्पादनमात्र इत्यर्थः। किंच व्याकरणादपि प्रबल रांम° ३८
याश्रुत्येव राजपदार्थनिर्णय इत्याह·पादशब्देति·वैदिकानिर्देशस्य सर्वजनोबलवत्वेन तत्परिहारायजत्तोपि प्रबलवैदिकनिर्देशात्

वनेनापि ज्ञातमाह· नतावदिति· अन्यथापि· उक्तनिर्देशविरुद्धत्वापि· तत्सद्भावात्· वैदिकनिर्देशस्य सद्भावात्· तमेवाह· राज्ञा
नमिति· प्रागेवेति· अभिषेकोत्तरं हि राज्यं न तु ततः प्राक्· प्रजापालनधर्मस्याभिषेकादिगुणयुक्तं प्रत्येव विधानात्· अभिषेकस्य
च राजानमुद्दिश्य विधानात्पूर्वसिद्धस्योद्देश्यत्वादिति भावः। मात्र येत्रपालनतादिव्यवच्छेदः। रूढमिति· क्षत्रियत्वजातिवाचकमेव
न तु प्रजापालनकर्तृस्वरूपसखंडोपाधिनिमित्तमित्यर्थः। ननु कृयावैदिकनिर्देशयोस्तुल्यत्वालोकप्रत्येकस्यैव निर्णायकत्वे त्वाशं
कमपूर्वस्य दौर्बल्यहेतुमाह· यदीति· निपातानां द्योतकत्वेनार्थाभागस्य बोधकरणान्यायेनान्यथासिद्धत्वमित्यर्थः। व्याकरण
स्मृतेस्तु यथ्रध्वत्वादप्युक्तेएवनिर्देशो बलवानित्याह· स्मरणाच्चेति· स्वतंत्रं· राज्ययोगानपेक्षं· तस्य· स्मरणस्य· अभियुक्तेति· शब्दा
र्थाभियोगशालिपाणिन्यादीत्यर्थः। आचारस्य· दृष्टं तीतनार्थावर्त्तत्वासिप्रयोगस्य· संभवदिति· संभवन्नेगोणः तथाभ्रांतिरा
दिः कारणमस्य तथाभ्रांतो यः प्रयोगः पूर्वं यात त्वमस्तत्स्य तन्मूलकस्येत्यर्थः। प्रयोजनं पूर्वपक्षे ब्राह्मणादिकर्तृकत्वनिमित्तं
राजसूयप्रयोगमध्य एव मध्यानिधानादिविशिष्टः पंचहविष्कैकप्रयोगः। पृथक्प्रयोगत्वेमध्यविधानासंभवात्· एवं च सति दृ
ष्टानिष्टिप्रयोगाअनुलोमादिविषयत्वेनव्यवस्थापनीयाइति· सिद्धांते तु राजसूयाद्बहिर्ब्राह्मणादीनां पंचहविष्कैकप्रयोगः
न च राजन्यस्यनित्यप्राप्तत्वापदिराजन्यमिति वाक्यस्य कथं प्रापकत्वमिति वाच्यं· वैयर्थ्याभियाराजन्यपदस्यानभिषिक्तक्षत्रि

शा॰टी॰वै॰२।१
३९
39

यमात्रपरत्वेन तस्य वराजसूयेत्ता प्रत्वेनतं प्रतिविधापकत्वसंभवादिति· अवेष्टेनतत्संबंधि ब्राह्मणादिवाक्ये ब्राह्मणादिश्रवणा
न्नतुः प्रयोगान्तरं तत्प्रधानमुच्यते· कुतः। पत्तसंयोगात्· क्षत्रियस्येवतिशेषइति सूत्रार्थः॥ ॥आधाने॥ ॥संगतिंसूच
यति· अत्रापीति· तेनातिदेशिकीसंगतिरित्याशयः॥ तत्रेति· क्रतुनांविद्याग्निसाध्यत्वाद्धेतोस्तदुपाययोर्विद्याग्न्युपाययोः सा
धनभूतयोरुपनयनाधानयोराक्षेपादेवप्राप्तत्वात्। ब्राह्मणादीनामित्युभयान्वयि· निमित्तार्थो· वसंतादिविधाने प्रतिनिमित्त
त्वाधर्मापुनः श्रुतिनित्यर्थः। विद्यापाश्रभ्यर्हितत्वात्सर्वनिपाते पिसूत्रारूढतया प्रथममाधानप्राप्तिमाह· आहवनीयेति
वैदिकहोमसामान्यानुवादेनाहवनीयस्यविधानादित्यर्थः। आहवनीयश्चेति· अलौकिकसंस्काररूपाहवनीयत्वविशिष्ट
इत्यर्थः। विद्योपायत्वेनोपनयनप्राप्तिमुपपादयति· ज्ञानेति। उपनयने गुरूसमीपगमने· आधानप्राप्तिमाक्षिपति· न
न्विति· आदिपदेनगार्हपत्यदक्षिणाग्न्योः संग्रहः। एतदाक्षेपसमाधानमावयोस्तुल्यमित्याह· नवापीत्यादि· कथमाधा
नसाध्यत्वावगमः स्यादित्यन्वयः। आहवनीयस्येति शेषः गुणवाक्येति· नक्तादिकालत्र्यादिसंख्यमंत्ररूपांगविधापि
वाक्येत्यर्थः। शब्दाभिधानीयकं· शब्दाभिधेयं· प्रत्यक्षविधौसंभवत्येवं विधाक्षेपकल्पनायोगात्पक्षांतरमाह· अथवेति·
गुणानपहन्तेति· गुणश्रवणाबाधितधात्वर्थविधितात्पर्यकमित्यर्थः· एकांतिकीति· उपनयनविषयेनियतेत्यर्थः· आधान

राम॰
३९

विषये तु · तत्रत्पुरुषानिपत्तेत्यर्थः ।सामान्यवचनं · ब्राह्मणादिसाधारणं पएवं विद्वानग्निमादधीतेति · वर्त्तमानापदेश
कं · वर्त्तमानात्तपावोधकं · विधिप्रत्ययप्रत्ययमितिपावत् · क्त्वादिति · पदस्यात्याहिधात्वर्थविधिरेवास्य संगतोप्याप्यः ।
वाधकबलात्परंतत्यागइतिभावः ।तेनैव · आधानेनैवं० सर्वैः क्रतुकारिभिः ।वर्त्तमानेति · सिद्धवत्रिर्देशत्वदृशमित्यर्थः
लेडंतत्वस्यापिसंभवात्स्वरूपसिद्धेः · कृशान० लेडंतत्वकल्पनपा · अप्रसंभरतीत्युदकादिसंभारस्यापनविधेरर्थवादत्व
स्पष्ट ग्रस्यत्यागेन · पएवंसंभारादिविद्वानग्निमादधीतेत्येवं संपत्रेभ्रातृव्यं शत्रुमवर्त्तिवर्त्तनरहितोपघास्यात्तथासहतेजपती
त्यर्थवादार्थः ।प्रयोजनमपश्च द्वाधिकारः सिद्धांते · पर्वपक्षे सर्ववर्णाधिकारः ।आधानेऽज्ञातताधानवाक्ये क्रतुप्रधा
नमुच्यते त्यनुषंगः कुतः असर्वशेषत्वात ब्राह्मणादिसर्वशेषत्त पाऽप्राप्तेरितिसूत्रार्थः ॥ ॥अपनेषुचीदृत्तांतरसं
त्तोपबंधात ॥ ॥इहकर्मभेदापवादादृत्तांतरसंगतिसूत्रपत्राह किंकर्मांतरेति · ज्योतिरादिवत् · अप्येषज्योति
रित्यादिवत् · ननुतत्राप्यशकेन प्रकरणविच्छेदवदिहतदभावात्रभेद इत्याशंक्य भेदकांतरमाह · अपिचेति ।अनन्य
परपुनः श्रवणरूपादभ्यासाद्भेदसिद्धिरितिवक्तव्यापिशदोप्युच्चयोक्तिसूचनार्थः संनिधौत्वविभागादितिस्यायेनाप्य
सभ्यासंभवात्पुनः श्रुतेः फलसंबंधार्थत्वेनान्यपरत्वाभावात् · साकमिति · सहेत्यर्थः ।वाक्यशेषादिति · द्विहियोर्गामास्यो

शाटीवै२।१
५०
50

पजेतद्वे अमावास्ये इत्येवंरूपादित्यर्थः। अवयवयोगश्चदक्षस्य पजमानस्येमे दाक्षायणाः त्विजस्तेषामयनमावृत्तिसद्धा
नितियावत्‌ आवृत्तिपरिच्छेदश्चाद्विवारमितिनिवाक्यशेषाद्गम्यत इत्यर्थः। एवं साकं सह प्रस्थानं यत्रेति योगार्थः केनेत्याहित्य
मित्यपेक्षापांसहकुंभीभिरभिक्रामं जुहोतीतिवाक्यशेषात्कुंभीसाहित्यप्रतीतिः। होमार्थेदधिमयः कुंभीभ्यां सहगमनं गुणः कुंभी
भिरिति द्वयोश्चोदनः। अनयोर्दाक्षायणसाकंप्रस्थाय्यशब्दयोः प्रयोजनं पर्वपक्षे दर्शपूर्णमासप्रयोगाद्वहिरेतत्रयो
गः। सिद्धान्तेतु दर्शपूर्णमासयोरेवावृत्तिरिति। सूत्रार्थस्तु अयनेषु बहुवचनमाद्यर्थं दाक्षायणयज्ञेनेत्यादौ वेदनान्त
रेकर्मान्तरं संज्ञासंबंधादिति॥ ॥संस्कारश्च॥ ॥इह कर्मान्तरत्वसिद्धान्तादपवादसंगतिः। दर्शपूर्णमासयो
रित्यनन्तरं प्रकरणइतिशेषः। ईषा अनसोधिनिर्वपतीति शकटोपरिनिर्वापविधानाच्छकटसंबंधिकाष्ठभेदः। आतंचःस्पर्शः
। निर्वपतीत्यनन्तरमाम्नानमित्यन्वयः इतरश्चेतरच्चेति वापव्यामितिसोर्थमितिचेत्यर्थः। तेजो देवत्यत्वेति आग्नेयोहिनिर्वाप
स्तेजोदेवत्यत्वगुणयोगाद्दोषायौर्पपदेनोक्त इत्यर्थः। पदालभतेत्यालभ्यमानेषानुवादेनश्वेतत्वविधिः। सार्वकाम्यमिति राम॰
सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति वचनेन भक्तिब्रह्मवर्चसफलयोरपि तत्र प्राप्तत्वादित्यर्थः। पाक्षिकेति फलान्तराणामपि ५०
सत्वेननियजताभावादित्यर्थः। निरर्थकश्चानुवाद इत्याह आनर्थक्येति यावदुक्तं निर्वापालंभमात्रं ननु दार्शपूर्णमासिका

कार्त्तमनिर्वापाश्रितोऽस्त्वेतच्चरूपफलेविधानव्याघातस्तमाह॰ लोकेपिवेति॰ अप्रकृतत्वेननतद्योगाग्रयत्वसंभवइतिभावः। यथा
कथंचिदिति॰ संबंधमात्रेणतद्धितवर्णनेनेत्यर्थः। ननुदेवतापदवशाद्यागएवावधीयतामतआह॰ यागस्येति॰ अश्रुतयागाध्या
हारापेक्षयासंबंधमात्रेणतद्धितांगीकरणमिवयुक्तमित्यर्थः। सिद्धांतमाह॰ देवतेति॰ वायव्यमितिपदस्यसौर्यमित्यस्यचानुवादत्वे
प्यर्थ्यंअप्रयोजनत्वं॰ नकल्पितः। तेनदेवतापदेनस्वार्थान्वयानुपपत्त्याकल्पितआध्यान्दतः। उक्तमिति॰ अर्थाद्वाकल्पनैकदेश
त्वादित्यत्रोक्तमित्यर्थः। वाक्यार्थइति॰ यथाश्रुतवाक्यार्थइत्यर्थः। चोदकात्। आग्नीषोमीयंपशुमालभेतेत्यग्नीषोमीयपशुया
गातिदेशात्॰ विशसनरूपस्यालंभस्यतत्रविधानात्॰ अथवालंभःस्पर्शः। सचार्थादेवप्राप्तइत्याह॰ अयैनवेति। यागमिति॰ वायु
देवत्यत्वंहिवापदेशोनत्पद्यमानत्वेनतुवायुशब्दोद्वारणाकालीनालंभवत्वं॰ त्यागंविनातद्याव्यवहाराभावदितिभावः। एवंसौ
र्यंवाक्येप्याग्नेययागातिदेशप्राप्तनिर्वापानुवादोयागविधानेचस्पष्टत्वान्नोक्तं॰ प्रयोजनंतुस्पष्टम्॰ अप्रकरणेपिश्रूयमा
णः प्राकृतसंस्कारएव॰ कुतः अकर्मशब्दत्वात् अदृष्टार्थकर्मविधापकशब्दाभावादितिसूत्रार्थः॥ ॥विशयेप्रायद
र्शनात्॥ ॥आग्नीति॰ अग्निहोत्रांगयपःसंपादकदोहविधिसंनिधावित्यर्थः। प्रत्युदाहरणसंगतिंसूचयन्पूर्वपक्षमा
ह॰ तत्रेति॰ वत्सालंभोवत्सद्रव्यकयागार्थः प्राणिद्रव्यकालंभत्वात्॰ पश्वालंभवदित्यनुमानादित्यर्थः। स्पष्टंप्रयोजनं॰ विश

श्रौटीवै॰२।१ ४१ चेयागविधिसंशयेप्रायेणवाऽऽरुष्येनयागंविनापिदर्शनात्संस्कारप्राप्यपाठाद्वासंस्कारएवेतिपूर्वसूत्रस्यसंस्कारपदानुवृत्त्यासूत्रार्थः
॥ ॥संयुक्तस्त्वर्थशब्देनतदर्थः श्रुतिसंयोगात्॥ ॥अग्निदवनप्रकरणगतंवाक्यमुदाहरति • चरुमिति • एतच्चैन
४१ वारश्चरुर्भवति • बृहस्पतीर्वाएतदन्नंयन्नीवाराइत्यनेनतरंश्रुतम् • आतिदेशिकींसंगतिंसूचयन्संशयमाह • अत्रापीति • पू
र्वपक्षमाह • नेत्रेति • वाक्यशेषबलाच्चरुर्भवतीतिचरुद्रव्यकबृहस्पतिदेवताकयागविधिर्याग्योपयुक्तस्यचस्थंडिलउपनि
धानेप्रतिपत्तिः साचैककार्यंतयाप्राप्तत्प्रतिपत्तिबोधिकेत्यर्थः। विशेषइति • यथाक्ताः शर्कराउपदधातीतिविध्ययेक्षि
ताञ्जनसाधनद्रव्यविशेषोऽष्टनरूपस्तेजोवैघृतमितिवाक्यशेषादित्यर्थः। अनपेक्षितोयथादेवताविग्रहादिः। ननुचैरु
र्भवतीतिविहितचरुद्रव्यस्यफलाकांक्षायांयोग्यत्वारूपसिंगेनयागार्थत्वमेववाक्यशेषावगतदेवतासंबंधवशेनकल्पनी
यमित्याशंक्याह • चरुश्चेति • प्रकरणसहकृतेनचरुमुपदधातीतिवाक्येनचयवापूर्वसाधनीपधानांगत्वेनविपोगात्रोत्का
कांक्षास्तीतिनयागकल्पनेत्यर्थः • चरुमितिद्वितीयावशादुपधानस्यसंस्कारकर्मत्वंतुनाशंकनीयम् • प्रतमाणुपयोगरहि
तचरोः संस्कार्यत्वासंभवेनसक्तुवद्विनियोगभंगस्यावश्यकत्वात् • इष्टकासाधर्म्यस्थंडिलेचरोर्दृष्टोपयोगासंभवात् • प्र राम:
योगंनैस्पष्टं • अर्थशब्देनप्रयोजनवाचिशब्देनाउपदधातीत्यनेनसंयुक्तश्चरुस्तदर्थएव • उपधानश्रुतिसंबंधादितिसूत्रार्थः ४१

॥ ॥पात्नीवद्धेत नतु पूर्ववत्वादवच्छेदः॥ ॥नन्वेति। द्वितीयवाक्य इत्यर्थः। किमिति। पर्यग्निकरणं नाम ज्वलतोल्मुके
न परितो भ्रमणं तद्युक्तं यस्यास्तादृशी यो ऽगरीति रंगानुष्ठानप्रकारस्य द्रूपस्य गुणस्य पूर्ववाक्यविहितयागे विधिरित्यर्थः। त
स्येति। तस्याः पर्यग्निकरणांतांगरीतेः संस्थास्थितिर्यत्र तादृशेत्यर्थः। पूर्वोक्तस्यार्थवादगतदेवतातद्धितस्य देवतापर
त्वाभावरूपस्य सिद्धान्तहेतोः प्रत्युदाहरणेन पूर्वपक्षोत्थानाच्च संगतिरिहत्येषा। गुणविधिरुत कर्मान्तरमिति वार्त्तिकानुसार
ण प्रथमं प्रसिद्धान्तकोटिरनंतरं च पूर्वपक्षकोटिरुक्ता। इदानीं तदंगसंशयं पूर्वपक्षकोटिं पूर्वकमेवाह। तदर्थमिति। कुर्या
दिति प्रत्ययार्थकथनं उत्सृजतिरुक्तप्राप्त्योत्सर्गो ऽनुवाद इति भावः। एवं पर्यग्निकृतमित्यप्यनुवादः अतिदेशप्राप्तत्वादिति ते
यं। उतेति। यद्युत्सृजन्तीति यागमनूद्य पर्यग्निकरणान्तांगरीतिविधिरित्यर्थः। ननु तद्धितः पत्नीवतश्चानिरपेक्षमेव देवतात्वं
पृथक्कृततद्धितश्रवणादिति केवलपात्नीवतशब्दादपि पूर्वकर्मोपस्थितियुक्तेत्यत आह। न चेति। एतदेव प्रपंचयति। नत
वदिति। उत्पत्तीति। यागविधायकेत्यर्थः। पर्यग्निकरणविशिष्टेति। विशेषणत्वमित्यंगत्वावर्त्तकं तत्पेतिभावः। वाक्यभे
द इति। अनुवाद्यविशेषणस्याप्यप्राप्तत्वेन विधाने ऽनेकविधानाद्विध्यावृत्तिरूपो वाक्यभेदः स्यादित्यर्थः। क्रमः। पर्य
ग्निकरणोत्तरकालतारूपः। न चानंतर्यरूपक्रमो विधेय इति वाच्यं। क्त्वाप्रत्ययस्य भूतकालमात्रवाचित्वेन उक्तक्रमलक्षणायां

शाटीवै २१
४२

42

मानाभावात्· वाक्यार्थस्य कर्मान्तरविधानेनोपपत्तेरिति भावः। मन्त्रोक्तेति· अग्नीषोमीयपशुप्रकरणोक्तत्वेन प्रथमोप
नीतेति मन्त्रगतकेवलाग्निपदेन यथाग्नीषोमप्रकाशनं तथेत्यर्थः। आग्नेयवत्· आग्नेयपदवत्· निरपेक्षाग्निदैवत्यस्य
वतद्धितेन सामर्थ्यवशेनाभिधानादित्यर्थः। मन्त्रोक्तास्याग्निपदे तद्धिताभावाद्युक्तमेकदेशद्वारेण विशिष्टोपस्थानमिति
भावः। तद्धितसत्वेपि तस्य विशिष्टादनुत्पत्तेर्नाग्नीषोमन्यायइत्याह· उत्पत्तीति· व्यासक्त· अतएव सापेक्षमित्यर्थः। युगपदिति·
एककर्मान्वयस्यैकेनवाक्येनावगतेर्देवतयोः समुच्चयोनत्वसमुच्चितयोर्देवतात्वमित्यर्थः। द्वित्येति· द्वित्वजनकताहि नद्वि
त्वसापेक्षा यथेति भावः। गुणविधिमुपपादयति· अतइति· प्रागेवेति· अतिदेशस्य कल्प्यत्वेनोत्तरभावित्वात्प्रत्यक्षवाक्यस्य
ततः पूर्वमेव प्रवृत्तेरित्यर्थः। एतत्फलमाह· तेनवेति· पर्यग्निकरणान्तांगकलापेन चेत्यर्थः। गृहमेधीयवदिति· यथा तत्रातिदे
शतः संभवत्प्राप्तिकयोराज्यभागयोः प्रत्यक्षवाक्येन विधानान्निराकांक्षतया नातिदेशकल्पना तथेहापीत्यर्थः। एवं च
प्रापकाभावादुत्तरांगानिवृत्तिरर्थसिद्धेति न त्रैदोष्यम्· ननु पर्यग्निकृतशब्देन कथं तदन्तांगकलापप्रतीतिरत आह शक्तोतीति·
पर्यग्निकृतशब्दो हि भूत पर्यग्निकरणान्तां प्रकृतौ दृष्टां विधत्ते· प्रकृतौ च पूर्वांगकलापपूर्विकैव सा क्लृप्तेत्यर्थात्तत्कलापप्र इति भावः। रांम° ४२
प्रयोजनं तत्स्पष्टमेव कर्मान्तरानुष्ठानाननुष्ठानाभ्याम्॥ पात्नीवतेत्युक्तवाक्यपूर्वत्वात्पूर्वकर्मानुवादादवच्छेदः पर्यग्निकरणा

नांगकलापस्यैव विधेय इति सूत्रार्थः॥ ॥अद्रव्यत्वात्केवले कर्मशेषः स्यात्॥ ॥एष इति। यः अदाभ्यसंज्ञकं ग्रहं गृही
त्वा सोमाय यजते सोमरूपदेवतोद्देशेन त्यजति एष यजमानो हविर्धारणो मरूपेण हविः सोमरूपमेव यजते यद्देवहविस्तद्देवदे
वतारूपमित्यर्थः। योंऽशुं नाम ग्रहं गृह्णाति तस्य प्राणाः आयुः परैति क्रामति आयुषो धिकमपि जीवतीत्यर्थः। सिद्धांतेप
क्षे गौणसूत्रप्रवृत्तेर्मानुसारेण पूर्वसिद्धांतकोटिनिर्देशः पूर्ववद्देवप्राप्तकर्मणो गुणमात्रविधिसाधनतादातिदेशिकी संगति
। अनर्हत्वादिति· इतरव्यवच्छेदार्थो हि नामधेयं· संस्कारकर्मणश्च संस्कार्यसंबंधाद्देवतुल्यसिद्धेर्न नाम्नः प्रयोजनमिति भावः
नन्वंशुवाक्ये यत्ति देवतयोरश्रवणात्कथं यागविधिस्तत्राह· अंशो त्विति· अशावाक्यार्थसंबंधाद्देवत[illegible] इत्यर्थः। गृह्णाति
चोदनेति· यथांऽशुकर्मणो गृह्णातिना विधानं तथा ज्योतिष्टोमिकग्रहणानामपीति सादृश्योपस्थितज्योतिष्टोमिकग्रहणां
गद्रव्यदेवतातिदेशेन यागरूपतानिर्णय इत्यर्थः ज्योतिष्टोमशब्दस्तत्संबंधिग्रहणपरः। वस्तुतोऽव्यक्तत्वेन ज्योतिष्टोमातिदे
शाद्यागसिद्धिरिति त्रेयं नामधेयपर्य्यं परिहरति· नदिहेति· मे दृश्यो यांश्वं तर्यामादिग्रहेभ्यः। ज्योतिष्टोमांगत्वे प्रमाणमाह·
तयोरिति· उपांशुयाजादाप्याप्यादिग्रहणसत्त्वाद्ग्रहणं ज्योतिष्टोमाव्यभिचारीत्याशंक्याह· अथवेति· प्रयोजनं तु पू
र्वपक्षे स्वर्गार्थकर्मान्तरमनुष्ठेयं· सिद्धांते नेति· अद्रव्यत्वाद्देवताशून्यत्वात्केवले यागशून्ये ग्रहणमेव कर्मणो ज्योतिष्टोमस्य

शा॰टी॰वै॰२।१
४३
43

शेषांगत्वेन विधेयं स्यादिति सूत्रार्थः॥ ॥अग्निसूत्र॥ ॥अथात इति। अथ अग्निचयनानंतरं अतश्चयनस्याहवनीया
धारस्थंडिलोत्पादकत्वात्वमनुस्थंडिलस्यापि तेग्नो अग्निष्टौमेन यजेतेति चयनस्यक्रत्वंगतावोधके। आदिना ते द्विरात्रेणाने
त्रिरात्रेणोत्पादि संग्रहः स्वतंत्रमिति। अग्नौन्यवेत्यार्थवादिकफलार्थतनुक्रत्वंगतित्यर्थः।सिद्धांतको घुत्वेरवादाति दैशिकी
संगतिः सूचिता। प्रथमपक्षमुपपादयति। तत्रेति। प्रकरणे। क्रतुप्रकरणे। न्ती प पत्तद्दूषणेनैवद्धितीयंदूषयति। तदभावे
चेति। अध्यारव्यार्थवादिकफलेन संस्कारत्व विरोधीतिभावः। तस्माद्यागविधानमेवेदमित्याह। अत इति। अग्निसंज्ञकं यागं कुर्यादि
त्यर्थः।एतदेगमतानि संस्कारकतयावेष्टकाभिरग्निं चिनुत इत्यनेनचयनं विधीयत इति प्राप्तार्थत्वाच्चिनोतिरनुवादः प्रत्यया
नुग्रहार्थ इत्याह। चिनोतिश्चेति। अग्निशब्दस्य यागनामतामुपपादयितुं वृच्छति। कथं पुनरिति। अग्नियागानुवादेन संस्थावि
धावनुशब्दवैयर्थ्यापत्तेरग्निमनु अग्निष्टोमेन यजेतेत्यर्थमभ्युपेत्याप्यग्निपदस्य यागनामत्वमुपपादयति। यद्यपीति। अ
नुशब्दस्य सजातीयक्रियापश्चाद्भावबोधकत्वस्यैवमनुपपन्नत्वादिति भावः।एतदेव विशदयति। नहीत्यादि। अग्निशब्दमात्रेण
कथं चयनसंस्कारस्याविनियोगस्तत्राह। अत्रेति। प्रयोजनं स्पष्टं। अग्निरग्निशब्दः अनुशब्दो यागनामधेयं। लिंगदर्शनात्। रा॰म॰
अग्नेःस्तोत्रमित्यादिव्यपदेशदर्शनात्तस्य चयनमात्रेणनुपपत्तेरिति सूत्रार्थः॥ ॥प्रकरणांतरे प्रयोजनान्यत्वं॥ ॥ ४३

अधुनेत्यनेन गुणप्रकरणेनावसरसंगतिः सूच्यते। अनंतरसंगतीस्फुटयथा दूरस्थाग्निहोत्रमानुवादेनाग्निविधिरेवमग्निहो
त्राद्यनुवादेन न मासादिविधिरित्यपवादिकी ज्ञेया। कुंडपायिनामयनमितित्र विशेषनाम। उपसद्भिर्नामेष्टिविशेषः। चरित्व
तस्य योगं कृत्वेत्यर्थः। नैयमिके। यावज्जीवं कर्तव्यतया विहिते। प्रकरणान्तरं लक्षयन्नेव तद्भेदकत्वसंशयस्य पर्वसंशयहेतुमाह।
तदर्थं चेति। अनुपादेयेति। उपादेयगुणसंबंधाभावानुगृहीतइत्यर्थः। यथाश्रुतेऽनुपादेयगुणस्यैवासंनिधिसंस्कृतस्य भेदकत्वो
पत्त्या षष्ठप्रमाणाभावप्रसंगात्। ननु मासस्य कृत्यसाध्यत्वात्कथं विधेयतेत्याशंकाह। उपादेयमिति। उपादेयत्वं कृतिविषयत्वं
दाश्रयत्वान्यतरवत्त्वं तदभावोनुपादेयत्वं। तत्र विधिः शास्त्रं तस्य प्राप्तविषयः। अप्राप्तं शास्त्रमर्थवदिति न्यायात्। यद्यपि प्रव
र्तनारूपत्वात्स्वविषयस्य प्रवृत्तिसाध्यतारूपमुपादेयत्वमपि बोधयति तथापि कालादावयोग्यत्वात्स्वयोग्याधिकरणत्वमा
त्रमवगमयतीति विधेयत्वमुपपद्यत इति भावः। ननु देशयत्वविधेयत्वयोर्विरोधात्कालस्य च यो मासस्तत्र कर्म कुर्यादित्युद्दे
श्यत्वात्कथं विधेयतेत्याशंक्याह। अन्यथेति। तथा चोद्देश्यत्वविधेयत्वयोर्न विरोधः किंतूद्देश्यत्वोपादेयत्वयोरेवेत्यर्थः। विधी
ति। उत्पत्तिविधिनिबंधन इत्यर्थः। नोपादानेति। न कृतिसाध्यताबोधकप्रयोगविधिनिबंधन इत्यर्थः। अविधीयमाने। अनुत्पा
द्यमाने। प्रकृतोपस्थितावस्य प्रकरणपाठस्याभेदकत्वान्न दृष्टमिति। किमिदमिति। अप्रकृतेति। प्रकृतानभिधानमित्यर्थः। यथाश्रुता

र्थस्य भेदसिद्धेः प्रागनुपपत्तेः। एवमग्ने पत्न्यामग्निहोत्रशब्देनैव प्रकृताभिधानात्कथं तदभाव इत्याक्षिपति · कथमिति · नैयमि
यमिकस्य · नित्याग्निहोत्रस्य · नन्वेवं सति वाक्यभेदापादको गुण एवमभेदकः स्यादिति शंकामपाकरोति · अत्र चेति · तथा च गुणः
प्रकरणान्तरोत्थापकतयान्यथासिद्ध इत्यर्थः। एवं यथाश्रुतभाष्यार्थं दूषयति · यद्येवमिति। वार्त्तिककृन्मतेन सिद्धान्तमाह अ
सन्निधानमिति · अनुपस्थितिरित्यर्थः। यदाहवनीये जुहोतीत्यादावसन्निधानेपि कर्मभेदाभावात्कथमेतद्भेदसाधकमित्याक्षि
पति · कथं पुनरिति · असंनिधानमुत्सर्गतो भेदकमेव। क्वचित्तु तदपवाद इति समाधत्ते। उच्यत इति · पूर्वोक्तो नोत्सर्गः उत्तरार्धेन च तद
पवाद उक्त उपादेयगुणयोगात्। तत्रोपादेयगुणविध्यनुरोधेन कर्मानुवादायेक्षापा दूरस्थस्यापि बुद्धिविषयत्वसिद्धिः अनुवाद
स्य प्राप्तविषयत्वात्। एतदेव कथं विदित्यनेनोक्तं · अपवादं प्रपंचयति यत्रेति · उपादेयत्वं ह्युद्देश्यसापेक्षमिति तद्बलेन दूरस्थस्या
प्युपस्थानं · न च मासादेरुपादेयत्वमस्ति यद्बलेनोद्देश्यतया कर्मोपस्थानं स्यादिति भावः। एवं च पारिशेष्यात्कर्मण एवोपादेयत्वं मास
स्य तु स्वरूपतः सिद्धस्योद्देश्यत्वमित्याह · योमास इति। नन्वस्तु कर्मण उपादेयत्वं · विधेयत्वं तु मासस्यैवाधिकरणतया ज्ञाप्यत्वरूपमि
ति कर्मोत्पत्त्यविधानान्न भेदः स्यादत आह · तेनेति · कर्मणोवश्यमुपादेयत्वेनेत्यर्थः। शब्दस्वारस्यतः। उद्देश्यबोधकत्वसामर्थ्यात् · त्रियैव
त्यवकारो विधानत्वेपि वेति संबंधनीयः। उपादेयत्वस्य हि विधेयत्वसामानाधिकरण्यमुत्सर्गसिद्धमपवादाभावेन बाधनीयमिति भावः। व

द्देशनिमित्तयोरनुपादेययोरुदाहरणमपि बोध्यमित्याह · एवमिति। आगर्त्यसंकल्प्यं। अत्रत्र संकल्प्यं तदकरणनिमित्तमिति दर्शमे
वक्ष्यते · जुहोतिनारुद्रस्य होमा प्रत्यभिज्ञाने पिनाम्ना प्रत्यभिज्ञाना दर्भेदमाशंक्यापाततो धात्वर्थाभेदमंगीकृत्य भावनाभेदासिद्धिमा
ह · नन्वित्यादिना · वस्तुतो धात्वर्थोपि भिद्यत एवेत्याह धात्वर्थपि चेति · पर्वापरीभूतः साध्यक्रियारूपो लिंगसंख्यान्वयायोग्यः। ननु सर्वेष्व
पिज्योतिष्टोमइत्यादौ क्रियापदाभावात्तात्रैव प्राप्तज्योतिष्टोमस्य फलसंबंधमात्रं तत्र यागभेदमानाभावइत्याशंक्याह · जद्भेदेपीति ·
भावनाभेदमात्रमेव तत्रेष्टमित्यर्थः · प्रयोजनं स्पष्टं च स्पष्टम्॥ ॥फलं चाकर्मसंनिधौ॥ ॥एककाम इति · एक · कांतिः त्रैधा
तव्या इष्टिविशेषस्तस्याश्च दीक्षणीयेष्टिरूपत्वाभावात्तस्य दीक्षणीयापदे तत्कार्ययजमानसंस्कारलक्षणं नयाच त्रैधातव्या
दीक्षणीयाकार्यकारिणीत्यर्थः। आतिदेशिकीसंगतिमुक्त्वा पत्राह तत्रापीति · कर्मांतरेति · आग्नेयात्तरत्रैधातव्यांतरत्यर्थः। ननु स
त्रांतरवैयर्थ्यकालदेशनिमित्तफलसंस्कार्याणां पंचानामप्यनुपादेयत्वसाम्यादित्याशंक्याह तदिदेहेति · प्रकरणांतरशब्देन हि अन्यत
प्रकरणमुच्यते तेन क्रत्वंतरप्रकरणगतानां भेदः। एककाम्यवाक्यत्वतत्तारम्याधीनत्वान्न प्रकरणांतरस्य विषयइत्यधिकाशंकानि
रासार्थमस्त्रांतरमित्यर्थः। त्रैधातव्याद्युदाहरणोक्षेत छकाऽसंभवाच्छकांतरमाह · पाचेति · फलस्येति संस्कार्यो फलक्षणं · उपपत्तिमाह ·
शकांतरति · कामपितुमित्यनेवोद्देशात्मकक्रियाविष्टत्वादेवताकफलसंस्कार्यपोरः प्यनुपादेयत्वसंभवच्छकः। आद्याशंकांनिरस्यति ·

पर्वत्रापीति· आविपरिवृत्तिरनुपस्थितिः। असंनिधाने· दूरस्थत्वे। द्वितीयाशंकां निरस्यति· यद्यपीति· देवत्तोद्देशेस्य प्राप्तत्वादुपादेयत्वात्प्र
योजक इति वैयर्थ्यमिति भावः। फलत्वेति· प्राधान्येत्यर्थः आन एवाह· विधीयमाने हीति· संस्कार्यमपि विधेयं तत्र प्राप्तत्वात्रोपादेयमित्याह·
एवमिति· संस्कारे· संस्कारवाक्ये· आक्षेपे· आक्षेपपदे· पौगिकमात्रत्वादिति भावः। प्रयोजनं नस्फुटमेव· फलं च शब्दात्संस्कार्ये च कर्मसंनिधा
नाभावमेदकमित्यध्याहारेणसूत्रार्थः॥ ॥संनिधौत्वविभागात्फलार्थेन पुनः श्रुतिः॥ ॥संगतिमाह· सर्वेषामिति· समे· सम
देशे· एतयाऽपूर्वोद्दाहृतावेष्टिनामकयेष्ट्या· शेषात् यागावशिष्टपुरोडाशात्· स्विष्टकृत्ते· एतद्गुणकायाग्नये· स्विष्टकृते यजतीति विहि
तस्य स्विष्टकृद्यागस्य पशेषरूपसंस्कार्यसंबंधार्थमिदं वचनं· उपादेयत्वेपि न विधेयत्वमित्याह शंकामाह· विधानमेवेति· विधेयत्वोपादेयत्व
योर्भेदमुपपादयति· निर्देशेति। निर्दिश्यमानगतेत्यर्थः। स्वातंत्र्यं श्रूयमाणकृत्यनधीनत्वं तदधीनत्वं च पारतंत्र्यं आस्ति चेदं सर्वत्रोद्देश्य
।मासादेः कृतिसामान्यानधीनत्वात्· दध्नाजुहोतीत्यादौ होमादेरपि न तस्य द्ध्याश्रुतकृत्यनधीनत्वात्· होमस्य हि आग्निहोत्रवाक्यश्रुतकृत्य
धीनत्वमेव न तु दधिवाक्यश्रुतकृत्यधीनतयानिर्देश इति भावः· प्राप्त प्राप्नोति· निर्दिश्यमानगत प्राप्य प्राप्ति प्रयुक्ताविन्यर्थः। उपादेयमपी
ति· देशकालयोरधिकरणयोः कृत्यधीननतया बोधितमपीत्यर्थः प्रत्यभिज्ञापन इति हेतोः प्राप्तं तस्मात्वाउवाधमित्यर्थः ननूपादेयत्वे
पि विधेयमिति भावः ननूपादेयत्वं विधेयत्वं च द्वयं वा विधिबोध्यं· तत्रोपादेयत्वस्य कर्मत्वाबोधनेपि विधेयत्वं कस्य बोध्यमित्याशंकामाह· तस्यावि

ति॰ कर्मणाइत्यर्थः। उपदिष्टत्वसाम्यनाधिकरण्यं हि विधेयत्वस्यौत्सर्गिकं तदिह सन्निधानेनापोद्यत इति भावः। ननु देशकालयोरुत्पत्तिवि
धिविषयत्वासंभवे व्यंग्यत्वाद्धि नियोगविधिविषयत्वमालोचनसमीपगमनादिक्रियावेशेन संभवेत् निमित्तादीनां तु न कथंचिदित्ति कर्मैव
विधेयमित्याशंकते अस्तु तावदिति॰ कर्मणां विधिविषयत्वमंगीकृत्य समाधत्ते॰ सत्यमिति॰ विधातव्यं॰ विधिविषयः कथं तर्हि न भेद इत्यत
त्राह उत्पत्तीति॰ प्रवृत्तेर्नावबोधकस्य हि विधेर्विषयभेदाश्चत्वारो भेदाः। उत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिरिति॰ तत्र तद्रूप
पकारज्ञानकर्तव्यताज्ञापनमुत्पत्तिविधिरग्निहोत्रं जुहोतीत्यादौ॰ फलादिरूपांगिसंबंधितया कर्तव्यताज्ञापनं विनियोगविधिः स्वर्गकामो यजेत
व्रीहिभिर्यजेतेत्यादौ यागादिस्वरूपकर्तव्यतायामानांतरेणाज्ञातत्वात् व्रीह्यादावसंभवाच्चांगांगिसंबंधमात्र एव विधेस्तात्पर्यं प्राप्ताप्राप्तविवे
केनगच्छत॰ देशकालकर्त्रादिसंबंधित्वेन सांगकर्तव्यताज्ञापनं प्रयोगविधिरुदाहृत एव॰ तत्रापि देशकालकर्तृरूपांगसंबंध एवांगसाहि
त्यपितात्पर्यात्॰ एवं यावज्जीवमित्यादौ निमित्तसंबंधपरतया जीवतोधिकारज्ञापनादधिकारविधिः। अपि च फलवाक्ये सर्वत्र विनियोग
विधिसंकीर्तितेयः एतेषु चाय एव भेदको नान्य इति भावः। कर्तव्यतामात्रं॰ कर्तव्यतासामान्यं॰ प्रयोजनं स्पष्टम्॰ संनिधावविभागादभेदात्फला
धर्यंतया पुनः श्रुतिर्वेति सूत्रार्थः फलपदं च अनुपादेयमात्रोपलक्षणं बोध्यम्॰॥ ॥आक्षेपसूक्त॥ ॥इहाविभागात्तु कर्मणाइ
तिसिद्धांतसूत्रेणाविभागादेवसिद्धांतकथनादाद्यदेशिकी संगतिः सूत्रांतरारंभप्रयोजिकामधिकाशंकामाह॰ अभ्यासादिति॰ आविशेषपु

नः॥ अतिरूपाभ्यासत्वलक्षणोऽविशेषपदार्थमभ्यधाम्न्वानः शंकते नन्विति॰ उक्तमविशेषपदार्थं दूषयति॰ नैवमिति॰ विधिश्रुतेर्वलमन
न्यपरत्वं॰ लवुंकरीत्याऽविशेषोप्यत्राह्ली त्वभ्युपेत्यवादेनाहः किं चेति॰ पंद्राग्नस्य प्ररोडाशस्य॰ प्रशंसेति॰ केवलाग्निदेवत्यस्य प्राशस्येमुत्तराग्नि
द्रसहिताग्निदैवत्यस्य प्राशस्त्यमिति रैंद्राग्नविध्येकवाक्यतयात्तदर्थवाद्यपामित्यर्थः। पर्वपक्षेऽमावास्यायां चत्वारि प्रधानकर्माणि॰ सिद्धांतेत्तु
त्रीण्ययेवेतिस्यंञ्चप्रयोजनं॰ आग्नेयस्याभ्यासेनभिन्नः प्रतीयेत॰ अभ्यासहेतोरुक्तत्वादिति सूत्रार्थः॥ ॥इति श्रीमत्पद्वाक्यप्रमाणाभि
ज्ञश्रीमत्तत्सद्रामभट्टात्मजवैद्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां द्वितीयस्याद्यः पादः संपूर्णः॥ ॥पावज्जीविकं
॥ ॥पावज्जीविक इति॰ पावज्जीवंभवो पावज्जीविकः धर्मोऽपूर्वसाधनं॰ अभ्यासः। प्रयोगावृत्तिरूपः नियमः पदापदाज्जीवनंतदातत्तद्
र्षदर्शपौर्णमासाविज्येवंरूपः। पुरुषार्थः पुरुषाभिलषितपापक्षयार्थः॥ अध्यायसंगतिह पर्वेति॰ अभ्यासविधिरित्यनंतरं अंगत्वेनेति शेषः भे
दस्यवत्तुपादेयान्वयनिमित्तत्वात्तत्संगरूपानंतरसंगतिर्ज्ञेया॰ कर्मागविधौ॰ कर्मागत्वेनाभ्यासविधौ कथंभाव इति कर्त्तव्यताकांक्षा॰ न द
सवंधात् इति कर्त्तव्यताकांक्षारूपप्रकरणासंवंधात्॰ अभ्यासलक्षणेति॰ अभ्यासस्यत्वांगत्वंनविधनाविना॰ तच्चनाश्रुतस्येत्यवशंपलक्षणाध्या
हाद्वोवास्वीकर्त्तव्यइतिभावः। नचपावत्पद्रोक्ताजीवनकालव्यापकत्वेनैवयागांगत्वेनविधेयेतिवाच्यं॰ तस्याः साक्षात्कर्मस्वरूपान्वयायोग्यतया 
द्वारभूताभ्यासाध्याहारस्यलक्षणापावावश्यकत्वात्॰ प्रत्यवायःपायंतस्यपरिहारः क्षयः धर्मेणायापमयनुदतीति सामान्यतः श्रुतत्वात्तात्प्रकरणजन्य 

प्रत्यवायप्रागभावस्यानादित्वपाभावनाभाव्यत्वायोगाच्चेति· निपतति· निपत्तिनिमित्ताक्षि प्रावश्यकत्वापरपर्यायपद्मत्पर्यः।प्रयोजनंसौर्यादिविक्र
न्तोपावज्जीविकोभ्यासः पर्वपक्षेसिद्धांतेतुनेति· सूत्रंस्पष्टार्थम्॥ ॥नामरूप॥ ॥आपवादिकीसंगतिंसूचयन्नविचार्यमाह· शाखांतरेऽपि
ति· अत्रभेदकप्रमाणेषुगुणाभ्यासौरूपपुनरुक्तिशब्दाभ्यांसूत्रोपात्तौप्रकरणांतरंतुसूत्रानुक्तमपिस्वपमुक्तं· नामधेयंतुसूत्रोक्तमपिकाठकादि
रूपंशाखावाच्येवलक्षणायानुकर्मणिप्रयोगइतिकर्मभेदासाधकत्वादुपेक्षितं· तथाधर्मविशेषोपिभेदकप्रमाणानंतर्गतत्वादुपेक्षितः यथाकारीरि
ष्टिवाक्याध्ययनेतैत्तिरीयाणांभूमौभोजनंनान्येषामिति· तच्चाध्ययनांगंनतुकर्मांगंयेनभेदकंस्यादिति· एवंउदितानुदितहोमनिंदापिनहिनिंदान्या
येनार्थवादत्वादुपेक्षिता एवंशाखाभेदेपिकर्मैक्येसर्वांगोपसंहाराशक्तिरपिनभेदहेतुः वह्वृनामंगानांसमानत्वादल्पाधिक्येनचाशक्तेरसंभवादि
तिनदुपेक्षा एवमत्रास्माकमग्निः परिसमाप्यतेनात्रेतिसमाप्तिवचनमपिअस्माकंयोग्निरित्यनन्वयाद्योग्निःसोस्माकमत्रसमाप्यतइत्यन्वयेनवा
भेदैप्यपत्तेःशाखाव्यवस्थयावसमाप्तिभेदोपपत्तेरुपेक्षितं· अग्निः।चयनंएवमुदितहोमिनामनुदितहोमेप्रायश्चित्तमपि· उपक्रमेसंकल्पितस्यवा
धादुपपत्तेर्नभेदहेतुरित्युपेक्षितं· अन्यथार्थदर्शनंनामलिंगदर्शनं· यथाकस्यांचिच्छाखायांद्वादशाहे· अथयद्येदीक्षाणाइत्यदीक्षादर्शनंभेदहे
तुः द्वादशाहेक्येहिएषवावप्रथमोयज्ञोयज्ञानांयज्ज्योतिष्टोमएतेनानिष्ट्वाऽथान्येनयजतेगर्त्तपत्यमेवतज्जायतेतितांडकशाखावचनेनान्येषामि
वद्वादशाहस्यापिज्योतिष्टोमानंतरत्वविधानाददीक्षितत्वदर्शनानुपपत्तिः भेदहेतुः तांडकविहितद्वादशाहस्यैवतद्वचनेनज्योतिष्टोमोत्तरताविधानात्

शाद्धी वै २।१
४७

द्वादशाहांतरस्य ततः प्रागप्यनुष्ठानसंभवाद्दीक्षितवचनोपपत्तिरिति । तदिदमभेदेपिनोपपद्यते । ज्योतिष्टोमोत्तरत्ववचनस्य अनारभ्याधीतत्वेन
द्वादशाहमात्रे तद्विधानात् । स्वशाखागतत्वस्य च मानाभावेनोद्देश्यतानवच्छेदकत्वात् । तस्मात्प्रभेदद्वयेपि तदुपपत्तिरन्यथैव वक्तव्येति न तत्साधक
मित्युपेक्षितं । यद्यपि चाभ्यासादीनामपि सिद्धिं तरीत्या परिहारोस्ति तथापि भेदकप्रमाणांतर्गततयाविशेषादुपन्यासः । अत एव सूत्रानुक्तमपि
प्रकरणांतरमुपन्यस्तमिति बोध्यम् । भेदकप्रमाणेहि स्ववाक्योपात्तस्य कर्मणो विधेयत्वं बोध्यते । विधिभेदस्त्वनुपपद्यमानः कर्मभेदं बोधयति । प्रकृ
तेतु शाखाभेदेनाध्येतृभेदादेव विधिभेदोपपत्तेर्न कर्मभेद इति सिद्धांतमाह । विध्वित्यादिना । न च शाखाभेदेनाध्येतृभेदे मानाभाव इति वाच्यं । स्वैरधीप
त इति व्युत्पत्त्यैकवचनेन च स्वाध्यायोध्येतव्य इति वाक्येन स्वशाखामात्राध्ययनस्यैवावश्यकत्वबोधनादिति भावः । अध्यायार्थमुपसंहरति । शब्दांते
ति । अति दूरेण । प्रकरणांतरेण । प्रयोजनमविरुद्धांगानामुपसंहारः । सूत्रं तु तत्तद्भेदहेतूपवर्णनेन व्याख्यातम् ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणाभि
ज्ञतत्सङ्गमभट्टात्मजवैद्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां द्वितीयोध्यायः संपूर्णः ॥ ॥ संवत् १८५६ ॥ ॥ ॥

राम०
४७